पाठकेन अनया वर्णनया सह- **"जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपम्"**[18],**"तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चित्"**[19],**"आद्ये बद्धा दिवस विरहे या शिखा दाम हित्वा शापस्यान्ते विगलितशुचा"**[20] मेघदूतस्य वर्णनायाः सामता प्राप्यते इति। वाल्मीकिना सीता- **"हिमहतनलिनीव नष्टशोभा व्यसनपरम्परया निपीड्यमाना"** अस्याम् अवस्थायां दृष्टा।**"ददर्श हनुमांस्तत्र लताकुसुमा। सा मलेन च दिग्धाङ्गी वपुषा चाप्यलङ्कृता"** इति सुन्दरकाण्डस्य सप्तदशाध्याये हनुमतः समीपे मलिना सीतापङ्कलिप्तपद्मिनीवत् प्रतिशुभ्यते इति। मेघदूते यक्षिण्याः अश्रुपूर्णनेत्रयोः यत् चित्रं कालिदासेन अङ्कितं तत् वाल्मीकिरामायणे विद्यमानेसति प्रकाशदिशतः

---

11. किष्किन्ध्याकाण्डे 12. अरण्यकाण्डे 60 सर्गे 13. मेघदूते (पूर्वमेघे), 4 श्लोके, पृष्ठाङ्के- 16 14. सुन्दरकाण्डे1/13

15. मेघदूते (पूर्वमेघे), 13 श्लोके, पृष्ठाङ्के- 47 16. सुन्दरकाण्डे 4/2 17. सुन्दरकाण्डे17/ 19-23

18. मेघदूते (उत्तरमेघे), 22 श्लोके, पृष्ठाङ्के- 258 19. तदेव, 25 श्लोके, पृष्ठाङ्के- 266 20. तदेव, 31 श्लोके, पृष्ठाङ्के- 281

कालिदासस्य महती प्रतिभा प्राप्यते इति। उत्तरमेघस्य एकस्मिन् श्लोके महाकविना कालिदासेन उक्तम्- **"साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम्"**[21] इति। शरदः रात्रौ चन्द्रः यथा एकवारं मेघेन आवृतं मुक्तं वा भवति तथावत् सीतायाः समावस्था- **"शरण्मुखेनाम्बुदशेषचन्द्रा, निशेव वैदेहसुता वभूव"**[22] । सीतया भयेन क्रन्द्यते इति। यथा-

**"ऊरुभ्यामुदरं छाद्य वाहुभ्याञ्च पयोधरौ। उपविष्टा विशालाक्षी रुदती वरवर्णिनी।।"**[23]

हनुमता संसितव्रता सीता दृष्टा। यथा-

**"अलंवृतायामासीनां धरण्यां संशितव्रताम्। छिन्नां प्रपतितां भूमौ शाखामिव वनस्पतेः।।"**

**"मलमण्डनदिग्धाङ्गीं मण्डनार्हाममण्डनाम्। मृणाली पङ्कदिग्धेव विभाति न विभाति च।।"**

**"शुष्यतीं रुदतीमेकां ध्यानशोकपरायणाम्। दुःखस्यान्तमपश्यन्तीं रामां रामामनुव्रताम्।।"**[24]

मेघदूतस्य उत्तरमेघे स्वप्नेन यक्षमिलनस्य चित्रं प्राप्यते इति। वाहुस्पन्दन-चक्षुस्पन्दन-प्रभृति-लक्षणानि शुभाशुभसूचकरूपेण महाकविना कालिदासेन अभिज्ञानशकुन्तलनाटके व्यवह्रियन्ते इति, मेघदूते नास्तीति। वाल्मीकिरामायणस्य सुन्दरकाण्डे अयं व्यवहारः हनुमत्संवादप्रसङ्गेन कथ्यते इति।

मेघदूतस्य मेघः रहस्यमयसंवादमेकं यक्षिणीं ज्ञापयतीति। इह हि तस्य प्रत्यभिज्ञानरूपचिह्नम् इति। अभिज्ञानशकुन्तल नाटके अभिज्ञानस्य कार्यं कृतं दुष्यन्तनामाङ्किताङ्गुरीयकेण इति। इदम् अभिज्ञानद्वयमेव वाल्मीकिना यूथः सीताप्रसङ्गेन प्रयोगं कृतम् इति। सुन्दरकाण्डस्य त्रयोविंशतिसर्गे हनुमता रामचन्द्रस्य सर्वजीवनकथासंक्षेपेण सीता उक्ता। अपि च इयं कथा तस्यां मनसि विश्वसितीति। तां कथां श्रुत्वा सीतायाः मनसि आयाति यत्-

**"अहो स्वप्नस्य सुखता याहमेव चिराहृता। प्रेषितं नाम पश्यामि राघवेण मनौकसम्।।"**

**"स्वप्नेऽपि यद्यहं वीरं राघवं सहलक्ष्मणम्। पश्येयं नावसीदेयं स्वप्नोऽपि मम मत्सरी।।"**

**"नाहं स्वप्नमिदं मन्ये स्वप्ने दृष्ट्वा हि वानरम्।"**

अत्र उत्तरमेघस्य स्वप्नदर्शनस्य कथा मन्यते न किम्?। हनुमता रामस्य अङ्गुरीयं अभिज्ञानरूपेण सीतायै प्रदत्तं तदा सीतया स्वामी पुनः प्राप्यते इति। यथा-

**"गृहीत्वा प्रेक्षमाणा सा भर्त्तुः करविभूषितम्। भर्तारमिव सम्प्राप्तं जानकी मुदितोऽभवत्।।"**

यक्षेण अनुमीयते यत्- विशुष्कावस्थायां यक्षिणी उत्तरमेघे प्राप्यते इति। यक्षिणी शिशिरमथिता पद्मिनीति। परन्तु रामायणे रामसंवादम् अभिज्ञानचिह्नञ्च लाभात् परं सीतायाः प्रश्ने असौ भावः प्रकाश्यते इति। यथा-

**"कच्चिन्न तद्धेमसमानवर्णं तस्याननं पद्मसमानगन्धि। मया विना शुष्यति शोकदीनं जलक्षये पद्ममिवातपेन।।"**[25]

सीतया रामस्य समीपात् अभिज्ञानरूपेण यथा अङ्गुरीयं प्राप्तं तथा प्रत्यभिज्ञानरूपेण स्वस्य चूडामणिः हनुमते दास्यतेइति। अचेतनमेघस्य अभिज्ञानबहनस्य उपायो नास्ति, प्रत्यावर्तनात् परं तेन यक्षः यक्षिण्याः वार्ताविषये प्रदीयते इति। चरवृत्तिवर्णना वाल्मीकिरामायणे अस्ति, परन्तु प्रमत्तयक्षस्य एतत् बोधं कुत्र अस्ति?। सीताहनुमतोः वाक्येन यत् स्पष्टीक्रियते, मेघदूतस्य इङ्गितधर्मीतायां तत् मधुरं परिस्फुट्यते इति।

यक्षिणीविरहेण यक्षः कथम् अस्ति तत् ज्ञातुं स न विस्मरति। तस्य वर्णना प्राप्यते इति। यथा-

**"अङ्गेनाङ्गं प्रतनु तनुना गाढतप्तेन तप्तंसास्रेणाश्रुद्रुतमविरतोत्कण्ठमुत्कण्ठितेन।**

---

21. तदेव, 29 श्लोके, पृष्ठाङ्कः- 276 22. सुन्दरकाण्डे 36/47 23. तदेव, 19 अ. 24. तदेव, 19/5-6, 8 25. सुन्दरकाण्डे 36/28

**उष्णोच्छ्वासं समधिकरतोच्छ्वासिना दूरवर्ती संकल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः।।"**[26]

हनुमतापि विस्तृतेन सीतायाः समीपे रामविरहजनितावस्थायाः वर्णना कृता इति। रामेण सीतायाः विरहेन मद्यादिसेवनं न कृतम् इति, ब्रह्मचर्यः परिपाल्यते इति, द्विदिवसात् परं सकृत् भोजनं कृतम् इति, सर्वदा सीताचिन्तायां विद्यमानार्थं मधुरं किमपि दर्शनात् परमेवसीतायाः कथा मन्यते इति। यूकमक्षिकाकीटाः तस्य गात्रे उत्थिते सति स तान् न प्रतिघ्नन्तीति।

रावणेन विवाहार्थं हायनं समयः सीता उच्यते इति। समये शेषे सति एकमासः अन्तिमः अस्ति। अतः अस्मिन् समये तेन विद्यते इति। स इमं वार्तां रामं प्रेषयतीति। मेघदूते यक्षेण अनुरुध्यते- शापावसानस्य चतुर्मासः समयः अन्तिमः अस्ति। अतः शरत्पूर्णिमायां रात्रौ तयोः मिलनं पुनर्भवति। अतः उच्यते- **"शेषान् मासान् गमय चतुरो लोचने मीलयित्वा"**[27] । मेघेन मिलनपर्यन्तजीवनधारणार्थं यक्षिणी उद्यते इति। सुन्दरकाण्डस्य ऊनचत्वारिंशत्सर्गे हनुमतः वदनात् इयं वार्ता श्रुयते इति। हनुमता उक्तम्- हे देवि! अस्मिन् भयङ्करे राक्षसावासस्थले अधिकदिनयावत् भवती न उष्यते इति। भवत्याः प्रियतमस्य आगमनमपि न विलम्वो भवति। रामेण सह मम साक्षात्कारस्य कालं भवत्या प्रतीक्षा क्रियते। अतः उक्तम्- **"न ते चिरादागमनं प्रियस्य, क्षमस्व मत्सङ्गमकालमात्रम्"**। मिलनस्य आश्वासवाण्या आशीर्वचनेन च मेघदूतस्य यथा परिसमाप्तिः भवति, तथा हनुमतःगमनपथः मङ्गलमयः भूयात्, एतेन आशीर्वादेन रामायणस्य दौत्यवृत्तान्तः समाप्तः जातः इति। अतः सीतया उक्तम्- **"शिवश्च तेऽध्वास्तु हरिप्रवीर"**[28] ।महर्षिणा कण्वेन **"शान्तानुकूलपवनश्च शिवश्च पन्थाः"**[29] अयम् आशीर्वादः पतिगृहे गमनकाले शकुन्तलायै प्रदीयते इति।

यक्षिण्या सह पद्मिण्याः वर्णनारूपवाग्विन्यासस्य सादृश्यं अस्माभिः वाल्मीकिकालिदासयोः रचनायां प्रत्यक्षं कृतम् इति। अपि च एकस्मिन् क्षेत्रे वाक्यविन्यासस्य सौसादृश्यं लक्ष्यणीयम् इति। सुन्दरकाण्डे सप्तदशाध्याये सीतां दृष्ट्वा मन्यते यत्- **"क्षीणपुण्यां च्युतं भूमौ तारां निपतितामिव"**। मेघदूते पूर्वमेघे एकत्रिंशत्संख्यकश्लोके उज्जयिन्याः वर्णनाविषये कालिदासेन उक्तम्- **"शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत् खण्डमेकम्"**[30] ।

मेघदूते यक्षेण भयः प्राप्तरिति। एतत् दिवसपर्यन्तं यक्षिण्याः मनसि अन्यः कोऽपि जनः आयाति किम्?। किष्किन्ध्याकाण्डे रामचन्द्रेन तस्मिन् वाक्ये न उच्चारिते कालमेघस्य अङ्के विद्युत्वर्णा सीता रावणस्य अङ्कशायिनी तपस्विनी इति प्रतिभाता। अतः उक्तम्-

**"नीलमेघाश्रिता विद्युत् स्फुरन्ती प्रतिभाति मे। स्फुरन्ती रावणस्याङ्के वैदेहीव तपस्विनी।।"**[31]

मेघदूते उत्तरमेघे उज्जयिणीवर्णनया स्वर्गलोकस्य छायारूपं कार्यं कृतम् इति। वैदिकसाहित्ये तथा कठोपनिषदि आदौ स्वर्गवर्णनायाम् अस्याः भावनायाः सूत्रपातं परिलक्ष्यते इति। लङ्कावर्णनायां तस्य किञ्चित् प्रतिरूपं परिलक्ष्यते। पण्डितैः मन्यते यत्- किष्किन्ध्याकाण्डस्य त्रिचत्वारिंशत्सर्गस्य उत्तकुरुजनपदवर्णनायां कालिदासः अस्मिन् विषये विशेषभावेन उद्योगः कृतः। उत्तरमेघे त्रयोदशश्लोके महाकविना कालिदासेन उक्तम्- कल्पवृक्षेण अलकायाम् अवलामण्डनं दास्यते इति। अपि च रामायणे उक्तवर्णनायाम् अस्ति यत्-

**"नित्यपुष्पफलास्तत्र नगाः पत्ररथाकुलाः। दिव्यगन्धरसस्पर्शाः सर्वकामान् स्रवन्ति च।।"**

**नानाकारणानि वासांसि फलन्त्यन्ये नगोत्तमाः। मुक्तावैदुर्यचित्राणि भूषणानि तथैव च।**

**स्त्रीणां यान्यनुरूपाणि पुरुषाणां तथैव च।**

---

26. मेघदूते (उत्तरमेघे), 41 श्लोके, पृष्ठाङ्के- 309 27. तदेव, 49 श्लोके, पृष्ठाङ्के- 330 28. सुन्दकाण्डे 40/24 29. अभिज्ञान-शकुन्तलनाटके (चतुर्थोऽङ्के), 11 श्लोके, पृष्ठाङ्के- 296 30. मेघदूते (पूर्वमेघे), 31. किष्किन्ध्याकाण्डे 28/12 श्लोके, पृष्ठाङ्के- 102

अलकायां सर्वमेव सुन्दरम् इति, सर्वत्र आनन्दस्य भावः वर्तते। उत्तरकुरुवर्णनायाम् अस्ति यत्-

**"तत्र नामुदितः कश्चिन्नात्र कश्चिदसत्प्रियः। अहन्यहनि वर्धन्ते गुणास्तत्र मनोरमाः।।"**

उत्तरमेघे एकादशश्लोके कामिभिः यक्षैः वैभ्राजनामकोपवने वाराङ्गणाः अप्सरसश्च भोग्याः। अपि च उत्तरकुरुवर्णनायाम् अस्ति यत्-

**"गन्धर्वाः किन्नराः सिद्धाः नागा विद्याधरास्तथा। रमन्ते सततं तत्र नारीभिभास्वरप्रभाः।।"**

**"सर्वे सकृतकर्माणः सर्वे रतिपरायणाः। सर्वे कामार्थसहिता वसन्ति सह योषितः।।"**

उत्तरमेघे पञ्चदशश्लोके यक्षगृहे वर्णनाविषये कालिदासेन उक्तम्-

**"ततः काञ्चनपद्मनाभिः पद्मिनीभिः कृतोदकाः। नीलवैदुर्य्यपत्राढ्या नद्यस्तत्र सहस्रशः।।"**

**"रक्तोपलवनैश्चात्र पण्डिताश्च हिरण्मयैः। तरुणादित्यसङ्काशा भान्ति तत्र जलाशयाः।।"**

**"महार्हमणिपत्रैश्च काञ्चनप्रभकेशरैः। नीलोत्पलवनैश्चित्रैः स देशः सर्वतो कृतः।।"**

**उपसंहारः**

संस्कृतसाहित्यैः आलोचकैः ततः ज्ञायते यत्- कालिदासकाव्येषु भिन्नशास्त्रेषु प्रभावः व्यापकः इति। अपि च तस्य ज्ञानरूपं जगत् सुविशालम् इति। इमं सौसादृश्यं दृष्ट्वा कालिदासः रामायणस्य उपयुक्तरसभोक्ता आसीदिति मन्यते। अस्मिन् शोधप्रबन्धे केवलं मेघदूतस्य प्रेक्षापटरूपक्षेत्रे वाल्मीकिना सह सादृश्यम् आलोच्यते इति। रामायणस्य एकं निर्दिष्टं लक्ष्यं वर्तते इति। तत्र आख्यानभागः नियुज्यते इति। गीतिकविमहाकविदृष्ट्या अत्र पार्थक्यं वर्तते इति। महाकविरचना कदापि प्रतिविम्वा न भूत्वा रसचमत्कारीचित्तचर्वणायां नूतनं रूपं प्राप्यते इति। अस्मिन् प्रसङ्गे ध्वनिकारस्य कथा मनसि आयाति यत्- वसन्तकाले यदा वृक्षाः तेषां जीर्णपत्राणि निःसृत्य नवपत्रैः नवरूपैः सुसज्जिताः भवन्ति, तदा कः वदिष्यति- इमेते पुरातनाः जीर्णाः वा वृक्षाः? इति।

**परिशीलितग्रन्थावली**

1) वन्द्योपाध्यायः, उदयचन्द्रः & वन्द्योपाध्यायः, अनीता। सम्पादकौ। मेघदूत ओ परिक्रमा। संस्कृत बुक डिपो। कलकाता। सेप्टेम्वर, 2016।

2) वसुः, अनिलचन्द्रः। सम्पादकः। अभिज्ञानशकुन्तलम्। संस्कृत बुक डिपो। कलकाता। आगस्ट, 2011।

3) शास्त्री (झा), वैद्यनाथः। व्याख्याकारः। मेघदूतम् ('इन्दुकला' संस्कृत-हिन्दीव्याख्योपेतम्)। चौखम्बा कृष्णदास अकादमी। वाराणसी।

4) रेग्मी (शर्मा), शेषराजः। व्याख्याकारः। मेघदूतम् ('चन्द्रकला' संस्कृत-हिन्दीव्याख्योपेतम्)

5) शर्मा, चतुर्वेदी द्वारकाप्रसादः। अनुवादकः। श्रीमद्वाल्मीकि-रामायणम्। इलाहाबाद। 1927।

6) महर्षिः वाल्मीकिः। श्रीमद्वाल्मीकीय-रामायणम्। गीताप्रेस। गोरखपुर।

*****************************

**ISSN 2250-1711**
**Journal of Veda Samskrita Academy**
**A National Peer-Reviewed Research Journal**
**Volume : XXVI, July to December-2025**

# सामवेदे कल्पसूत्राणां परिचयः

**विद्वान् कुमार भट्टः**
अध्यापकः, सामवेदविभागः
महाराज संस्कृत महापाठशाला
मैसूरु- 570024, कर्नाटक
Mobile : 9481069152
E-mail : kbht342@gmail.com

वेदोऽखिलो धर्ममूलमिति प्रसिद्धा उक्तिः । पूर्वमीमांसाशास्त्रेऽपि चोदनालक्षणोऽर्थो धर्मः इति सूत्रे वेदप्रतिपाद्यः यागादिरेव धर्मः इत्युक्तम् । अत्र वेदानां संरक्षणार्थम्, अर्थज्ञानार्थञ्च षट् अङ्गानि विद्यन्ते । तानि यथा -

शिक्षा व्याकरणं छन्दो निरुक्तं ज्यौतिषं तथा । कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः ॥ इति ।

एवञ्च शिक्षा, व्याकरणम्, छन्दः, निरुक्तम्, ज्यौतिषम्, कल्पश्चेति षट् अङ्गानि वेदस्य विद्यन्ते । तत्र कल्पो नाम कल्पसूत्राणि । तान्यधिकृत्य किञ्चित् विव्रियते अत्र ।

प्रथमं तत्र सामवेदशाखाध्यायिषु औत्तरेयाः, दाक्षिणात्याः इति द्वौ विभागौ कल्पनीयौ । कुतः इति चेत् दाक्षिणात्यैः यानि सूत्राणि अनुस्त्रियन्ते तानि औत्तरेयैः नानुस्त्रियन्ते । सूत्राणां विषये, आचार्याणां च विषये औत्तरेयाणां दाक्षिणात्यानां च भेदो विद्यते ।

यथा दाक्षिणात्याः सामगाः द्राह्यायणश्रौतसूत्रम्, खादिरगृह्यसूत्रं च अनुसरन्ति । इमानि सूत्राणि प्रायः उत्तरभारते न अनुस्त्रियन्ते, न अनुष्ठीयन्ते च । उत्तरभारते तावत् लाट्यायनश्रौतसूत्रम्, गोभिलगृह्यसूत्रं च अनुस्त्रियते ।

दाक्षिणात्याः विशेषेण - गौतमीयापरसूत्रम्, गौतमधर्मसूत्रम्, वामनकारिका, खादिरगृह्यसूत्रम्, द्राह्यायण श्रौतसूत्रम् इतीमान् ग्रन्थान् अनुसरन्ति, अवलम्बन्ते च । क्वचित् वेदशाखासु एकेनैव आचार्येण श्रौतसूत्राणि, गृह्यसूत्राणि, धर्मसूत्राणि, शुल्बसूत्राणि च प्रणीतानि विद्यन्ते । किन्तु सामवेदे एवं प्रकारेण एकेनैव आचार्येण प्रणीतानि सूत्राणि न दृश्यन्ते । किमत्र कारणमिति गवेषणं तु बहु क्लेशाय कल्पते । वस्तुतः एकेनैव आचार्येण प्रणीतेषु सूत्रेषु सत्सु तेषाम् अध्ययनाध्यापनाद्यभावेन कालान्तरे तानि सूत्राणि विनष्टानि किम् ? इत्यपि प्रश्नः मनसि जायते । एवं सूत्रेषु विनष्टेषु सत्सु अपरेण आचार्येण अन्यानि अनुपलभ्यमानानि सूत्राणि प्रणीतानि भवेयुः इत्यपि वक्तुं शक्यते । अथवा एते आचार्याः एकस्मिन्नेव काले आसन् । ते एकत्र मिलित्वा यथाज्ञानं विविधेषु विषयेषु पृथगेव सूत्राणि विरचयाञ्चक्रुः इत्यपि वक्तुं शक्यते । यथा एकः आचार्यः श्रौतविषये निष्णातो भवति । अतः सः श्रौतसूत्राणि रचयति । अपरः आचार्यः संस्कारविधौ नदीष्णः भवति । अतः सः गृह्यसूत्राणि रचयति । इत्थं द्वाभ्यामपि दृष्टिभ्यां विवरणं प्रदातुं शक्यते ।

एकेनैव आचार्येण विरचितानि सूत्राणि विनष्टानीति कारणेन अन्यैः आचार्यैः नूतनानि सूत्राणि विरचितानि वा ? इत्यत्र साधूत्तरं न लभ्यते, महतः कालस्य अतीतत्वात् । सम्प्रति उपलभ्यमानानि सूत्राणि आश्रित्यैव श्रौतानि, स्मार्तानि च कर्माणि अनुष्ठेयानि भवन्ति । इत्थमत्र दाक्षिणात्याः इति यत् निरूपितं तत् राणायनीषाखाध्यायिनां विषये, कौथुमशाखध्यायिनां च विषये समन्वेति ।

तृतीया शाखा विद्यते । सा जैमिनीया शाखा । जैमिनीयशाखानुयायिनः दाक्षिणात्यानां सूत्राणि, ग्रन्थान् वा नानुसरन्ति । ते तु जैमिनीयं श्रौतसूत्रम्, जैमिनीयं गृह्यसूत्रम् च अनुसरन्ति । अत्र तु दाक्षिणात्याः, औत्तरेयाः इति च भेदो न वर्तते । सर्वेऽपि जैमिनीयशाखानुयायिनः जैमिनीयसूत्राण्येव सनुसरन्ति । तानि आश्रित्य विरचितान् प्रयोगांश्च कुर्वन्ति । अतः दाक्षिणात्याः, औत्तरेयाः इति भेदस्तु राणायनीशाखानुयायिनाम् कौथुमशाखानुयायिनां विषये एव अन्वेति ।

वस्तुतः खादिरगृह्यसूत्रम्, गोभिलगृह्यसूत्रं च सामवेदस्य अष्टब्राह्मणम् आश्रित्य विरचितं वर्तते । अष्टब्राह्मणेषु तावत् छान्दोग्योपनिषद्ब्राह्मणम् इत्यस्ति एकं ब्राह्मणम् । तत्र ब्राह्मणे प्रथमं द्वितीयं च अध्यायद्वयं समाश्रित्य खादिरगृह्यसूत्रम्, गोभिलगृह्यसूत्रं च भवतः इति विशेषः ।

अत्र एवमपि विषयविभागः वक्तुं शक्यते । अदितेऽनुमन्यस्व इति वाक्यादारभ्य माता रुद्राणाम् इत्येतदन्तं यानि वाक्यानि विद्यन्ते तानि सर्वाण्यपि सामगानां संस्कारसम्बन्धिविधिविशेषं विवृण्वन्ति । संस्कारविधिविशेषो नाम प्रायः जातकर्मादिसंस्काराः, नित्यकर्माणि, नैमित्तिकानि कर्माणि, काम्यानि कर्माणि, प्रायश्चित्तकर्माणि अथवा प्रायश्चित्तविधयः इत्येतेषां कर्मणां मन्त्राः एव । एते मन्त्राः छान्दोग्योपनिषद्ब्राह्मणे प्रथमे द्वितीये च प्रपाठके विद्यन्ते । एते मन्त्राः संस्कारविधिसम्बद्धाः सन्तीति कारणेन अनयोः प्रपाठकयोः मन्त्रब्राह्मणम् इति नामधेयमपि विद्यते । एतौ द्वौ प्रपाठकौ आश्रित्य (मन्त्रब्राह्मणम् आश्रित्य) गोभिलगृह्यसूत्रम्, खादिरगृह्यसूत्रं च विरचितं विद्यते । अत्र गोभिलगृह्यसूत्रे खादिरगृह्यसूत्रे च तेषां प्रथमद्वितीयप्रपाठकोक्तानां मन्त्राणां विनियोगक्रमः निरूपितो विद्यते । विनियोगक्रमो नाम कः मन्त्रः कस्मिन् संस्कारे, कस्मिन् प्रायश्चित्ते वा विनियुज्येत ? इति । एवमेव एकस्मिन् संस्कारे, प्रायश्चित्ते वा नाना विधानि कर्माणि भवन्ति । तेषां सर्वेषां कर्मणाः समूह एव संस्कारविधिः, अथवा प्रायश्चित्तविधिः भवति । यथा नामकरणसंस्कारः इत्युक्ते सति - दीपप्रज्वालनम्, घण्टावादनम्, आसनशुद्धिः, शरीरशुद्धिः, मार्जनम्, आचमनम्, कलशस्थापनम् इत्यादिकं भवति । कलशस्थापनं नाम केचित् रङ्गवल्लीं विलिख्य तदुपरि कदलीपत्राणि संस्थाप्य कदलीपत्रेषु व्रीहिम्, तण्डुलम्, धान्यं वा स्थापयन्ति । अन्ये केचन अक्षतान् भूमौ निक्षिप्य तदुपरि कदलीपत्राणि स्थापयन्ति । अन्ये केचन परिष्कृतायां नाम शुद्धायां भूमौ एव कदलीपत्राणि स्थापयन्ति । ते जनाः रङ्गवल्लीम्, अक्षतान् वा पूर्वं न भूमौ स्थापयन्ति । एवं देशभेदेन, कुलभेदेन, वेदभेदेन, शाखाभेदेन, सूत्रभेदेन च भारतदेशे नानाविधाः आचाराः प्रचलन्ति । तत्र कदलीपत्रेषु व्रीहिम्, तण्डुलम्, धान्यं वा स्थापयित्वा पश्चात् कलशं स्थापयन्ति ।

पश्चात् कलशे जलं पूरयन्ति । जले हरिद्राम्, कुङ्कुमम्, फलम्, दक्षिणाम्, पुष्पं च निक्षिपन्ति ।

अत्र धान्यस्थापनार्थम्, कलशस्थापनार्थम्, जलपूरणार्थम्, जले पुष्पादीनां निक्षेपणार्थं विभिन्नाः मन्त्राः सन्ति । अतः एषु कर्मसु कस्य कर्मणः कृते कः मन्त्रः विनियोज्यः इति गोभिलसूत्रे खादिरसूत्रे व विद्यते इति भावः । अत्र कलशस्य स्थापनमेव उदाहरणत्वेन प्रदत्तम् । पश्चात् वरुणावाहनम्, वरुणपूजा, पुण्याहवाचनम् इत्यादीनि विविधानि कर्माणि भवन्ति । तेषां कर्मणां समूह एव नामकरणसंस्कारः इति कथ्यते । एवमेव विवाहे, उपनयने वा विविधानि कर्माणि भवन्ति । तेषां कर्मणाम् अनुष्ठानार्थं के मन्त्राः प्रयोज्याः इति गोभिलसूत्रे, खादिरसूत्रे च प्रतिपादितमिति भावः । इत्थमनयोः सूत्रयोः मन्त्रविनियोगक्रमः विहितः, व्याख्यातश्चेति भावार्थः ।

अष्टसु ब्राह्मणेषु प्रथमं ब्राह्मणमेव ताण्ड्यब्राह्मणम् । अस्य पञ्चविंशब्राह्मणम् इत्यपि अपरं नामधेयं विद्यते । अत्र पञ्चविंशतिः अध्यायाः सन्ति । अनेनैव कारणेन पञ्चविंशब्राह्मणमिति नामान्तरं प्राप्तम् । एतत् ताण्ड्यब्राह्मणस्य आधारेणैव द्राह्यायणश्रौतसूत्रम्, लाट्यायनश्रौतसूत्रं च विद्यते ।

वामनकारिका तु खादिरगृह्यसूत्रम्, गौतमीयापरसूत्रं च व्याख्यातुमेव श्लोकरूपेण प्रवृत्तं विद्यते । अत्र सहस्राधिकाः श्लोकाः सन्ति । इयं वामनकारिका प्रयोगे बहूपयुक्ता विद्यते । सूत्रेषु अनुक्तोऽपि विषयः, सूत्रविरोधं विना व्याख्यातो दृश्यते इति वामनकारिकायाः वैशिष्ट्यम् । अतः सूत्रं दृष्ट्वा संशयं प्राप्ताः जनाः, पुरोहिताः वा इमा कारिकाः आश्रित्य समाधानं प्राप्नुवन्ति । अतः सामवेदप्रयोगविषये वामनकारिकाः अत्यन्तम् उपयुक्ताः सन्ति ।

एवमेव सामवेदीयगृह्यपरिशिष्टमपि विद्यते । वस्तुतः सूत्रैः सर्वोऽपि विधिः व्याख्यातः अस्ति । तथापि क्वचित् अवशिष्टः भागः, परित्यक्तः भागो वा संशयम् उत्पादयति चेत् तस्य संशयस्य परिहारः गृह्यपरिशिष्टे उपलभ्यते । अतः सूत्रैः सह गृह्यपरिशिष्टमपि उपयुज्यते सामगैः ।

इत्थं सामवेदीयप्रयोगे आधारग्रन्थानां कल्पसूत्राणां सङ्क्षिप्य परिचयः अत्र कृतो वर्तते । तत्र श्रौतसूत्राण्याश्रित्य श्रौतप्रयोगः यागादिः प्रवर्तते । गृह्यसूत्राण्याश्रित्य जातकर्मादीनि संस्कारकर्माणि अनुष्ठीयन्ते । अतः पूर्वप्रयोगे अपरप्रयोगे च कल्पसूत्राणां महत्त्वं प्रयोजनं च बहु विद्यते इति शम् ।

********

**ISSN 2250-1711**
**Journal of Veda Samskrita Academy**
**A National Peer-Reviewed Research Journal**
**Volume : XXVI, July to December-2025**

# भारतीयज्ञानपरम्परायां मनोवैज्ञानिकविचाराः तदुपयोगिता च

**Dr. Hitesh Trivedi**
Assistant Director, P.G. & Research Dept.
Bharatiya Vidya Bhavan
K.M. Munshi Marg, Grandt Road West
Mumbai, Maharashtra- 400007
Mobile : 9892568695
E-mail : trivedi.hitesh1@gmail.com

भारतीयज्ञानपरम्परायां मनुष्याणां सुखाय समुन्नतये च विविधानि शास्त्राणि प्रणीतानि सन्ति तेषु शास्त्रेषु मानवस्य मानसिकावस्थानां तथा तस्य विविधव्यवहाराणां विषये विशद्-चर्चा कृता यथा वेदेषु, उपनिषत्सु, रामायणे, महाभारते, पुराणे, काव्यशास्त्रे, कथासाहित्येषु च । विषयोऽयं सार्वत्रिकः सार्वकालिकश्च वर्तते । मनोविज्ञानम् - अर्थात् मनसः व्यवहाराणाञ्च वैज्ञानिक-अध्ययनमिति । विषयेऽस्मिन् मानवीय-अमानवीय-व्यवहाराणां, चेतनाचेतन-घटनानां, विचाराणां, भावनानां, मानसिक-प्रक्रियाणाञ्च समाधानं वर्तते ।

वेदेषु मानवस्य विकासाय, समाजस्य उन्नत्यर्थम्, राष्ट्रस्य सुदृढीकरणार्थं, विश्वस्य शान्त्यर्थञ्च विविधपक्षेषु ज्ञानं प्रदत्तम् । जीवानाम् आध्यात्मिकसुखाय, पारलौकिकसुखाय च उपनिषदादीनांविविधदर्शनशास्त्राणाञ्च मुनिभिः रचनाः कृताः । वैयक्तिकजीवनस्य सामाजिकजीवनस्य वा अभ्युदयाय च धर्मग्रन्थेषु व्रतानाम् उत्सवानाञ्च अतीव महत्त्वपूर्णस्थानं वर्तते तेषां विषये गहनविचाराः कृताः। एवं प्रकारेण रसानुभूतये साहित्यस्य विभिन्नानामङ्ग-प्रत्यङ्गानां निर्माणं कृतमस्ति तथा नायक-नायिकानां परस्परमनोभावानां विषये कविभिः काव्यानि रचितानि । मनोविज्ञानशास्त्रस्य बहूनां वैज्ञानिकानां सिद्धान्ताः चापि अस्मत्पूर्वजैः बहोः कालात् पूर्वमेव विविधशास्त्रेषु प्रदत्ताः किन्तु तेषां सिद्धान्तानाम् उपयोगः वर्तमानसमये कथं करणीयः इति जिज्ञासा वर्तते । इत्यस्मिन् विषये वयं पश्यामः तर्हि अस्माकं सारस्वतपरम्परायाम् उपस्थित-विचाराणां सम्यग्रूपेण अवबोधनेन ज्ञातुं शक्नुमः यत् तेषां विषये विविधसिद्धान्ताः वर्तन्ते ।

**वेदेषु मनोवैज्ञानिकचिन्तनम् - ऋग्वेदेसंज्ञानसूक्ते -**

**सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् । देवा भागं यथा पूर्वे संजानाना उपासते ॥** [1]

वयं सर्वे मिलित्वा गच्छेम,एकत्र वदेम,अस्माकं मनः एकीकृतं भवतु, पुरातनकाले देवानां यथा व्यवहारः आसीत्, अत एव ते पूज्याः सन्ति। सूक्तेऽस्मिन् ऋषिः पारस्परिकव्यवहरणं सम्यग्रूपेण कथं कर्तव्यमिति तथा तस्य उपयोगिता कथं भवेत् इति श्रेष्ठपुरुषाणाम् आचरणैः व्यवहारैश्च सूचयति प्रेरयति च ।

---

1. ऋग्वेद - 10. 191. 2

अत्र कायिक-वाचिक-मानसिक-क्रियाणां क्रमानुसारेण अनुसरणं करणीयम् इति वेदानाम् उपदेशाः सन्ति । अत्र **सं गच्छध्वं**इति पदंमानवचेतनायाः सामूहिकतां Human consciousness प्रेरयति, **सं वदध्वं** इति पदंसामंजस्यपूर्णचिन्तनस्य Harmonious thinking प्रेरणां द दाति । **सं वो मनांसि जानताम्** इति पदम्एकत्वयुक्त-चिन्तनं सामूहिकप्रयासञ्च unified thinking and collective effort निर्दिशति इति ।अनेन जनानां मनसि स्थैर्यतायाः, एकतायाः, तथा सामञ्जस्यस्य भावानायाः उदयोभवति ।

**यजुर्वेदे -शिवसंकल्पसूक्तम् -**

**यज्जाग्रतो दूरमुदैति दैवं तदुसुप्तस्य तथैवैति । दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिव संकल्पमस्तु ॥** [2]

यत् मनः जाग्रतावस्थायां दूरं गच्छति तथैव तत् सुप्तावस्थायां स्वप्नावस्थायां चापि दूरं गच्छति, मम मनः यत् प्रकाशकिरण इव दूरं गच्छति, यत् प्रकाशेषु अन्यतमं, तत् लाभप्रदविचारैः पूरितं भवेत् इति ईश्वरं प्रति प्रार्थना वर्तते । सूक्तेऽस्मिन् मनसः लक्षणगुणधर्मविषये चर्चा भवति । अस्य मन्त्रस्य मूलभावः मनःशुद्धिः, विधेयात्मकता, दिव्यता चेत्येषां परिपोषणं तु अवश्यकरणीयम् ।

**सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिनऽइव ॥**
**हृत्प्रतिष्ठंयदजिरं जविष्ठं तन्मे मनः शिवसंकल्पमस्तु ॥** [3]

यथा सारथिः अश्वान् इष्टस्थानं प्रति नयति, तथैव मम मनः महावेगेन गच्छत् हृदये प्रतिष्ठितञ्च, हे ईश्वर अधर्मात् सर्वाणि इन्द्रियाणि अपसारय, सर्वदा तानि सत्मार्गं प्रति नय। यदा एतेषां मन्त्राणां विधिदनुष्ठानं पालनं वा क्रियते तदा मानवानां जीवने नानाविधाः लाभाः भवन्ति । मनसि पवित्रता आयाति । संयमशक्तिः वर्द्धते । महापुरुषाणां वा देवानां कथाश्रवणेन संघटनात्मको भावः जागर्ति ।

**उपनिषदिमनोवैज्ञानिकचिन्तनम्-**

तैत्तिरीयोपनिषद् वेदान्तस्य प्रमुखग्रन्थोऽस्ति । अस्याम् उपनिषदि ब्रह्मज्ञानम्, आत्मस्वरूपम्, आनन्दश्चेत्यादयानां वर्णनं कृतम्। न केवलं दार्शनिकदृष्ट्या, अपितु मनोवैज्ञानिकदृष्ट्या अपि गहनविचाराः प्रदत्ताः । पञ्चकोषानां वर्णनमपि प्रति-पादितम् । यथा - अन्नमयकोशेऽस्मिन् शरीरात्मकावरणानां विषये, प्राणमयकोशे जीवनशक्तेः विषये, मनोमयकोशे: चित्तादिनां विषये यथा –

**यचो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् । न बिभेति कदाचनेति ।**

**तस्यैष एव शारीर आत्मा यः पूर्वस्य । तस्माद्वा एतस्मात् मनोमयादन्योऽन्तर आत्मा विज्ञानमयस्तेनैष पूर्णः – इति** [4] ।

विज्ञानमयकोशे बौद्धिकक्षमतायाः विषये, आनन्दमयकोशे परमात्मस्वरूपविषये, सःएव परमात्मा आनन्दस्य तथा शान्तेः मूलम् अस्ति। एतेषु कोशेषु मानवजीवनस्य भौतिक-मानसिक-आध्यात्मिकस्वरूपाणांविषये विषदरूपेण चर्चा कृता । आत्मसाक्षात्कारेण मानवः मानसिकसन्तुलनं प्राप्नोति । आनन्दस्रोतस्य यात्रा आन्तरिकशक्तिं च जनयति ।

---

2. यजुर्वेदः 34.1 3. यजुर्वेदः 34.6 4. तैतरियोपनिषदि चतुर्थानुवाके, पृ. 981,

पञ्चकोशाणां विचारः तु मानसिकविकासस्य प्रत्येकं स्तरं स्पष्टं करोति । अतः तैत्तिरीयोपनिषदि न केवलम् आध्यात्मिकविषये विचाराः प्रकटिताः, अपितु जीवनस्य मनोवैज्ञानिकपक्षेऽपि चर्चा कृता ।

**श्रीमद्भगवद्गीतायां मनोवैज्ञानिकचिन्तनम्** –

श्रीमद्भगवद्गीतान केवलं धार्मिकग्रन्थःअपितु मनोविज्ञानस्य गहनमूल्यानि उद्घाटयति । अर्जुनस्य विषादस्य समाधानं, कर्मयोगस्य, भक्तियोगस्य, ज्ञानयोगस्य च सिद्धान्ताः आधुनिकमनोवैज्ञानिकचिन्तनस्य अनुकूलाः सन्ति।

अर्जुनविषादयोगे - अर्जुनस्य मानसिकवृत्तिः क्लेशयुक्ता प्रदर्शिता । यथा - **गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते ।**[5] श्लोकेऽस्मिन् युद्धक्षेत्रे स्थितः अर्जुनः आत्मीयजनानां प्रति मोहयुक्तो भवतितथा कर्तव्यविमूढताम् अनुभवति। अर्जुनस्य ईदृशी अवस्था conflict of duties तथा cognitive dissonance इत्यस्मिन्स्थले दृश्यते । कर्तव्याकर्तव्यविषये तथा भावनात्मकसम्बन्धविषये च तस्य मनसि संघर्षो भवति ।अर्जुनस्य विषादः "anxiety disorder" वा "emotional breakdown" इत्यादिस्थितिं सूचयति ।कृष्णेन प्रदत्तं समाधानं - मानसिकस्थैर्यम् । कृष्णः अर्जुनस्य मानसिकदुर्बलतां दूरी कर्तुं योगविषयकं, धर्मविषयकं, तथा आत्मज्ञानविषयकं महत्वं प्रतिपादयति।

कर्मयोगे "**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।**[6] " मनुष्यः कर्तव्यं कुर्वन् फलस्य चिन्तां त्यजेत्।एषः दृष्टिकोणः stress management इति विषयं प्रतिपादयति। फलचिन्ता त्यक्त्वा वर्तमानकार्ये संलग्नो भव इति सूचयति । आधुनिकमनोविज्ञानं "mindfulness" Mindfulness is the practice of being aware of one's thoughts, feelings, and surroundings in the presentmoment without judgment or reaction. It can help people avoid automatic habits and responses. इत्येतद्विधिं प्रोत्साहयति।ज्ञानयोगेआत्मानं नित्यम्अविनाशं च ज्ञात्वा मानवः दुःखात् मुक्तिं प्राप्नोति।"self-awareness" आत्मसाक्षात्कारः तथा "emotional regulation" योगस्य लक्ष्यं भवति। मानसिकदुर्बलतायाः यानि कारणानि सन्ति तानि नामअहंकारं मोहं भयञ्च त्यजकर्तव्यं कुरु।

**अयं निजः परो वेति गणना लघुचेतसाम् । उदारचरितानां तु वसुधैव कुटुम्बकम् ॥**[7]

श्लोकोऽयं संस्कृतसाहित्यजगति प्रसिद्धोऽस्ति ।स्वकीयः वा अन्यः वा इति गणना लघुचित्तानां जनानां कृते एव अस्ति किन्तु उदारचरितानां जनानां कृते पृथिवी तु कुटुम्बम् एव भवति ।अनेन श्लोकेन "वसुधैव कुटुम्बकम्" इत्येतस्य प्रसिद्धसिद्धान्तस्य स्वरूपं निर्दिष्टं कृतम् । अस्मिन् पद्ये लघुचेतसाम्शब्दोऽयं चित्तस्य दौर्बल्यं मानसिकविकृतिञ्च प्रकट-यति । अन्यत्र उदारचरितानाम् इति वाक्ये चरितं शब्दोऽयं सद्वृत्तिसमूहस्य नाम, महापुरुषाणाम् आचरणात् उपदिष्टव्यवहारस्य प्रतिमानम्, मानवस्य विस्तृतमानसिकताम् च प्रदर्शयति । मनोवैज्ञानिकदृष्ट्या, "लघुचेतसः" इति शब्दः तु तेषां जनानां स्वकेंद्रितां सूचयति, ये केवलं आत्मनः निकटवर्तिजनानां वा स्वसमूहस्य एव हितं चिन्तयन्ति । एषा वृत्तिः in-group-out-group bias इति ज्ञायते, यत्र जनाः आत्मसमूहं (in-group) श्रेष्ठंमन्यन्तेतथाअन्यसमूहं (out-group) अवमानयन्ति।

---

5. गीता 1.30 6. गाता 2.47 7. महोपनिषद् 6.71 (Sanskrit document pg. 42, Internet - PDF format)

एषा प्रवृत्तिः तु भयेन, असुरक्षाभावेन वा आत्मपरत्वेन विकसितो भवति। अस्मिन् चिन्तने सह-अस्तित्वस्य विचारः नास्ति, केवलं "मम लाभः" इति मुख्यं भवति । "उदारचरितानां" इत्युक्ते ते जनाः ये स्वलघुचेतस्उल्लङ्घ्य सर्वेषां हितं चिन्तयन्ति । मनोविज्ञानस्य "empathy" (अनुभूतिकौशलम्) तथा "self-transcendence" (आत्मोत्तरणम्) इत्येते गुणाः तु अस्य भावस्य मूलाधारे विराजमानाः सन्ति ।उदारजनाः जगत् परिवारमिव मन्यन्ते, यतो हि ते विविधता (diversity) स्वीकर्तुं समर्थाः सन्ति । मनोवैज्ञानिकपक्षतः, एषः दृष्टिकोणः उच्चस्तरीय भावनात्मकबुद्धेः (emotional intelligence) तथा सामाजिकचेतनायाः परिचायकोऽस्ति ।

**साहित्ये कला-सौन्दर्यशास्त्रस्य मनोविज्ञानं –**

दृश्यकला, संगीतकला, चलचित्रं, प्रदर्शनं, साहित्यं, पर्यावरणं च तेषां धारणानाम् अनुभवानां च अध्ययनम् वर्तते । कला मानवीयघटना अस्ति, अतः सौन्दर्यशास्त्रं मौलिकरूपेण मनोवैज्ञानिकप्रक्रिया भवति । या चेतनाचेतनमनसः मध्ये उपस्थितान् व्यवहारान् प्रति आकर्षयति । सौन्दर्यशास्त्रस्य मनोविज्ञानस्य इतिहासः समकालीनस्थितिं प्रतिबिम्बयन् आधारभूतसाहित्यस्य परीक्षणं करोति।काव्ये उपस्थितपात्राणां मनोवृत्तीनां, चित्तद्वन्द्वानां, तथा मानसिकस्वभावानां मनोवैज्ञानिकं विश्लेषणं क्रियते । आधुनिकमनोवैज्ञानिकैः स्थापितानां केषाञ्चन सिद्धान्तानां माध्यमेन वयं भारतीयज्ञानपरम्परायां वर्तमानान् मनोवैज्ञानिकसिद्धान्तान् अवगन्तुं प्रयत्नशीलाः स्मः। भावः तु आनन्दः, दुःखः, प्रेम, क्रोधः इत्यादीनां मानसिकदशाविशेषस्य प्रतिबिम्बो भवति । यथा - उज्ज्वलनीलमणेः - **उपपतिः –**

**संकेतीकृतकोकिलादिनिनदं कंसद्विषः कुर्वतो द्वारोन्मोचनलोलशंखवलयक्वाणं मुहुः श्रृण्वतः ।**

**केयं केयमिति प्रगल्भजरतीवाक्येन दूनात्मनो राधाप्राङ्गणकोणकेलिविटपिक्रोडे गता शर्वरी ॥ [8] इति ।**

अत्र पद्यावली-समुद्धृत-पद्येश्रीकृष्णस्य औपपत्यं दर्शितम् इति निरूप्यते। वृन्दा पौर्णमासीं प्रति राधामाधवयोः प्रेमलीलां वर्णयति। अत्र ग्रन्थकारेण (श्रीरूपगोस्वामीना) उभयोः हृदि प्रच्छन्नकामुकत्वं दर्शितम्। श्रीकृष्णः राधायाः प्राङ्गणे मिलनार्थं तां संकेतयति। नायकनायिके रागेण धर्मम् उल्लङ्घयतः। प्रथमतः संकेतध्वनिं श्रुत्वा राधा हृष्टा भवति तदनन्तरं द्वितीयतः शंखवलयध्वनिं श्रुत्वा श्रीकृष्णः परमानन्दम् अनुभवति। अत्र जटिलायाः वृद्धायाः केयं केयम् इति वाक्यं तयोः मनसि शङ्काभावम् जनयति अत्र ग्रन्थकारेण श्रीकृष्णेन सह व्रजसुन्दरीणां लीलाविशेषः दर्शितः तथा लीलायां श्रृङ्गाररसस्य परमोत्कर्षता वर्तते इति निरूपितम्। अत्र नायक-नायिकयोः संकेतद्वारा क्रियानुक्रियायाः सम्बन्धः, क्रियाद्वारेण मानसिकभावानां परिवर्तनम् भवति इतिप्रदर्शितम् ।

**शाबल्यम् - यथा विदग्धमाधवे – व्यावहारिक-अध्ययनम् ।**

**धन्यास्ता हरिणीदृशः स रमते याभिर्नवीनो युवा, स्वैरं चापलमाकलय्य ललिता मां हन्त निन्दिष्यति ।**

**गोविन्दं परिरब्धुमिन्दुवदनं हा चित्तमुत्कण्ठते, धिग्वामं विधिमस्तु येन गरलं मानाभिधं निर्ममे ॥ [9]**

अत्र भावानाम् उत्तरोत्तरसंमर्दनं नाम भावशाबल्यम्।कलहान्तरितायाः राधायाः निर्जनस्थाने उक्ति-प्रत्युक्तिः।

---

8. उ.नी.1.18 9. उ.नी. 13.109

राधा चिन्तयति - यथा प्रथमे पदे चापल्यमौत्सुक्यम् (नित्यनवीनःश्रीकृष्णः रमणीभिः सह आनन्देन विलासं करोति) इति। द्वितीये शङ्का, (मम स्वेच्छारूपं दृष्ट्वा ललिता निन्दति ) तृतीये शङ्कायाः उपमर्दनम् (अत्र तस्याः हृदयं तु गोविन्दम् आलिङ्गितुम् इच्छति ), चतुर्थे औत्सुक्यम् (पुनः सा स्वात्मानं धिक्करोति, कारणम् इदं गरलमानस्य रचना विधात्रा कृता इति) च। अत्र अनेके भावाः उदिताः इति स्पष्टम्। अत्र राधायाः व्यवहारः तस्याः मानसिकदशां सूचयति । पूर्वक्रियाणां प्रभावेण राधायाः मनसि कृष्णं प्रति भावानाम् उत्तरोतरसम्मर्दनं भवति । वस्तुतः वयं ज्ञातुं शक्नुमः यत् अस्माकं साहित्यशास्त्रं न केवलं सौन्दर्यं दर्शयति अपितु मानवचित्तं स्पृशति ।

काव्यशास्त्रेषु मनोवैज्ञानिकविचाराः काव्यस्य प्रभावं, सृजनं, अनुभवं च स्पष्टं कर्तुं साहाय्यं कुर्वन्ति। अतः काव्यशास्त्रं मनोविज्ञानस्य सहकार्येण गहन-अध्ययनस्य योग्यं भवति। काव्यं पठित्वा रसिकानां मनसि किं किं जायते इति एते विचाराः मनोवैज्ञानिकदृष्ट्या महत्वपूर्णाः सन्ति ।

वस्तुतः भारतीयज्ञानपरम्परायाम् विभिन्नशास्त्रेषु विद्यमानाः मनोवैज्ञानिकसिद्धान्ताः सार्वत्रिकरूपेण दृश्यते । यथा वेदेषु, उपनिषत्सु, पुराणेषु, दर्शनेषु, काव्यशास्त्रेषु उपस्थितानां विचाराणां पठनेन वा महापुरुषाणां जीवनचरित्राणां विषयक-ज्ञानेन, अवलोकनेन, श्रवणेन वा मानवस्य जीवने अगणनीयाः लाभाः भवन्ति । सामुहिकचेतनायाः विकासो भवति, समाजे एकतायाः भावना जागर्ति, कर्तव्याकर्तव्यज्ञानं भवति, अनुभवो भवति, प्रतिस्पर्धायाः भावना जागर्ति, मानसिकसुदृढता भवति, उत्साहो जायते, अकर्मण्यता नश्यति, अलसता अपयाति, उच्चाभिलाषा उदयति च ।

******

## विषयसूची


1. Rigveda Samhita Vol.4m Mandal 9-10, by Wilson H.H., Parimal Publication 2001, Second revised Edition.
2. यजुर्वेदसंहिता, सम्पादक – श्री सत्यवीर शास्त्री, डी.पी.बी. पब्लिकेशन, प्रथम संस्करण
3. उज्ज्वलनीलमणिः श्रीलरूपगोस्वामिना प्रणीतः, गौडीयवेदान्त-प्रकाशनम्, प्रथमसंस्करणम्, 2006.
4. श्रीमद्भगवद्गीता – द्वितीय संस्करण, भक्तिवेदान्तबुक ट्रस्ट 1986
5. ईशादि नौ उपनिषद् – शांकरभाष्यार्थ- गीताप्रेस, गोरखपुर, द्वितीय संस्करण – सं. 2060
6. विदग्धमाधवम् – श्रीरूपगोस्वामिना विरचितम्, चौखम्बा संस्कृत सिरीज, विद्याविलास प्रेस, प्रथमसंस्करणम् 1970.


**********************************

ISSN 2250-1711
Journal of Veda Samskrita Academy
A National Peer-Reviewed Research Journal
Volume : XXVI, July to December-2025

# पाणिनीय प्रत्याहारों की अवधारणा

**अंकितकुमार पाण्डेय**
शोधछात्र ,संस्कृतविभाग
दिल्ली विश्वविद्यालय, दिल्ली – 110007
E-mail : ankitkumarpandeybhu@gmail.com
Mobile : 9455227317

**सारांशः-**

प्रत्याहार महर्षि पाणिनि के संस्कृत व्याकरण की अद्वितीय और वैज्ञानिक पद्धति का मूल आधार है।पाणिनीयप्रत्याहारों की अवधारणा व्याकरणशास्त्र मेंसंक्षिप्तता (लाघव)औरव्यवस्थितताप्रदान करती है। प्रस्तुत शोध-पत्रमहर्षि पाणिनिद्वारा रचितअष्टाध्यायीके अत्यंत महत्वपूर्ण अंगप्रत्याहारोंकेस्वरूप, प्रयोजन, निर्माण-पद्धतिऔरव्याकरण-सिद्धिमें उनके योगदान कासूक्ष्म एवं समीक्षात्मक विश्लेषणकरता है। यह शोध कार्य यह स्थापित करता है कि प्रत्याहार न केवलसंक्षिप्तीकरणका एक साधन है, बल्कि पाणिनीय व्याकरण कीतार्किक एवं व्यवस्थितसंरचना काआधारभूत स्तंभभी है।पाणिनीय सूत्र अत्यंतसंक्षिप्तहैं, और इस संक्षिप्तीकरण को प्राप्त करने के लिए ही प्रत्याहारों का प्रयोग किया गया है। यदि पाणिनि प्रत्येक सूत्र में वर्ण-समूहों को पूर्ण रूप से लिखते, तो उनकीअष्टाध्यायीका आकार कई गुना बढ़ जाता।प्रत्याहारएक ही प्रयत्नयासमान धर्मवाले वर्णों को एक शब्द में बाँधने का कार्य करते हैं (जैसेयण्से अंतःस्थ वर्णों का बोध)। यह व्याकरण के नियमों (सूत्रों) को समझने मेंसरलतालाता है।

**बीज शब्दः-**

पाणिनीय व्याकरण , प्रत्याहार , वर्णसमाम्नाय , माहेश्वर सूत्र , अनुबन्ध वर्ण

**प्रस्तावना**–

संस्कृत व्याकरण के इतिहास में पाणिनि का स्थान सर्वोपरि है।उनकी रचना **"अष्टाध्यायी"** न केवल संस्कृत भाषा काबल्कि विश्व भाषाविज्ञान का भी अद्वितीय उदाहरण है। पाणिनि ने अपने व्याकरण में संक्षिप्तता हेतु प्रत्याहार प्रणाली का प्रयोग किया है। प्रत्याहारों के माध्यम से वर्ण समूहों का संक्षिप्त उल्लेख संभव हुआ जिससे व्याकरण के सूत्र अत्यंत संक्षिप्त और प्रभावी बन सके।इस प्रणाली की संक्षिप्ततावैज्ञानिकता एवं संगठित स्वरूप का मूल आधार '**माहेश्वर सूत्र**'हैं, जिनसे प्रत्याहारों का निर्माण होता है। प्रत्याहार न केवल वर्ण संक्षिप्तीकरण की एक प्रक्रिया है,अपितु पाणिनि व्याकरण के प्रत्येक पक्ष की विशेषताएवंलाघव का उद्गम बिंदु भी है।यह शोध-पत्र पाणिनीय प्रत्याहारों की परिभाषा, संरचना, उपयोग, संस्कृत व्याकरण में उनकी भूमिका तथा प्रमुख विद्वानों एवं टीकाकारों (कात्यायन,पतञ्जलि,भर्तृहरि आदि ) की आलोचनाएँ, मतभेद और तुलनात्मक समालोचना आदि विषयों का विशद व गहन दृष्टिकोण के साथ प्रस्तुत करती है। पाणिनीय प्रत्याहारों का मुख्य उद्देश्य व्याकरणिक सूत्रों को अत्यंत संक्षिप्त एवं स्पष्ट बनाना है। यदि प्रत्याहारों का प्रयोग न किया जाता तो प्रत्येक सूत्र में वर्ण-समूहों को बार-बार विस्तार से लिखना पड़ता जिससे सूत्र न केवल दीर्घ और जटिल हो जातेबल्कि स्मरण और प्रयोग में भी कठिनाई होती।

प्रत्याहारों के माध्यम से पाणिनि ने वर्ण-समूहों का संक्षिप्त उल्लेख कर सूत्रों को अत्यंत संक्षिप्त और व्यावहारिक बना दिया।

**विषय वस्तु का विभाग:-**

पाणिनीयप्रत्याहारोंकिअवधारणाइसशोधपत्रमेंनिम्नबातोकाविवेचनकियाजायेगा .

* प्रत्याहारकाअर्थ व प्रत्याहारकिनिर्माणविधि

* प्रत्याहार सूत्रों का कार्य

* पाणिनिकेमतमेप्रत्याहार

* पाणिनिसेइतरआचार्योंकेमतमेंप्रत्याहार

* पाणिनीय प्रणाली में प्रत्याहारों का महत्व

* वर्णसमाम्नायसेअसंबंधप्रत्याहार

- प्रत्याहार की परिभाषा और व्युत्पत्ति:-

**प्रत्याह्रियन्तेसंक्षिप्यन्तेवर्णाःयत्र** – प्रत्याहारः प्रति एवं आङ उपसर्ग पूर्वक हृहरणे धातु से भाव अर्थ में घञ् प्रत्यय लगकर प्रत्याहार शब्द की निष्पत्ति होती है । व्याकरणशास्त्र में प्रत्याहार का अर्थ है –किसी वर्णसमूह या वर्णश्रेणी का निर्देश करने के लिए दो वर्णों के योग से बने ऐसे संक्षिप्त शब्द जो वर्णमाला के निश्चित अंश को संक्षेप में सूचित कर दें। भारतीय व्याकरण परम्परा में पाणिनि का योगदान अनुपम है। उन्होंने संस्कृत भाषा को एक वैज्ञानिक एवं नियमबद्ध स्वरूप प्रदान किया। उनके व्याकरण ग्रन्थ **"अष्टाध्यायी"** की संपूर्ण संरचना जिस अद्भुत प्रणाली पर आधारित है, उसे **"प्रत्याहार प्रणाली"** कहा जाता है।यह प्रणाली व्याकरण की सूत्ररचना में संक्षिप्तता और सटीकता लाती है। यदि प्रत्याहार न होते, तो प्रत्येक सूत्र अत्यधिक लम्बा हो जाता। उदाहरणार्थ — "अचोऽन्त्यादि " सूत्र में "अच्" शब्द के माध्यम से पाणिनि ने केवल दो वर्णों में सभी स्वरों को सूचित कर दिया। पाणिनिप्रत्याहारों की अवधारणा व्याकरण का आधारभूत तत्त्व है, जिसने अष्टाध्यायी को विश्व की सबसे संगठित, संक्षिप्त और वैज्ञानिक व्याकरणिक रचना बना दिया।

**प्रत्याहारों की संरचना – निर्माण-विधि, माहेश्वर सूत्र, माहेश्वर (शिव) सूत्र: प्रत्याहारों की आधारशिला**

पाणिनि ने संस्कृत वर्णमाला को चतुर्दश सूत्रों में विभाजित किया, जिन्हें माहेश्वर सूत्र या शिव सूत्र कहा जाता है।[1]

**माहेश्वर सूत्र (शिव सूत्र):**

अ इ उ ण्, ऋ ऌ क् ,ए ओ ङ् ,ऐ औ च् ,ह य व र ट् ,ल ण् ,ञ म ङ ण न म् ,झ भ ञ् ,घ ढ ध ष् ,ज ब ग ड द श् ,ख फ छ ठ थ च ट त व् ,क प य् ,श ष स र् ,ह ल् । इन सूत्रों में प्रत्येक का अंतिम वर्ण (जैसे ण्, क्, ङ्, च् आदि) 'इत्' संज्ञक है, जिसका प्रयोग प्रत्याहार निर्माण में केवल अनुबन्ध के रूप में होता है, परंतु वह स्वयं प्रत्याहार के वर्ण-समूह में सम्मिलित नहीं होता।

**प्रत्याहार निर्माण की विधि:-**

पाणिनि ने प्रत्याहार निर्माणके लिए 'आदिरन्त्येनसहेता'[2] सूत्र दिया है: जिसका अर्थहै, आदि वर्ण से लेकर अन्त्यइत् वर्ण के पूर्व

1. "नृत्तावसानेनटराजराजोननादढक्कांनवपञ्चवारम् । उद्धर्तुकामःसनकादिसिद्धानएतद्विमर्शेशिवसूत्रजालम्"

2. (अष्टाध्यायी1.1.71)

तक के सभी वर्णों का समष्टि रूप में बोध।

**निर्माण प्रक्रिया:**

प्रत्याहार का प्रथम वर्ण (आदि) कोई भी गैरइत्संज्ञक वर्ण होता है। प्रत्याहार का अंतिम वर्ण (अन्त्य) किसी माहेश्वर सूत्र का इत्-संज्ञक (हलन्त) वर्ण होता है। प्रत्याहार में आदि वर्ण से लेकर अन्त्यइत् वर्ण के पूर्व तक के सभी वर्ण सम्मिलित होते हैं। बीच में आने वाले अन्य इत् वर्णों की गणना नहीं की जाती। प्रत्याहार का नाम आदि वर्ण और अन्त्यइत् वर्ण को जोड़कर बनता है जैसे – अच्, हल्, इक्, यण् आदि।

**उदाहरण: अच्** = अ (आदि) + च् (अन्त्यइत्)- अ, इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ (सभी स्वर)

**हल्**= ह (आदि)+ल् (अन्त्यइत्) ह, य, व, र, ल, ञ, म, ङ, ण, न, झ, भ, घ, ढ, ध, ज, ब, ग, ड, द, ख, फ, छ, ठ, थ, च, ट, त, क, प, श, ष, स, ह (सभी व्यंजन)

* प्रत्याहार में अनुबंध का ग्रहण क्यों नहीं होता है ?

**"प्रत्याहारेऽनुबन्धानांकथमज्ग्रहणेषु न आचारादप्रधानत्वाल्लोपश्चबलवत्तरः"** [3]

अच् आदि में ण् आदि अनुबन्धों का ग्रहण निम्नलिखित तीन कारणों से नहीं होता है।

**<u>* आचारात्</u>** - अर्थात् आचारवशात्.

**<u>* अप्रधानत्वात्</u>** - अर्थात् गौण होने

**<u>* लोपश्चबलवत्तरः</u>** - अर्थात् लोप के बलवान् होने के कार।

*** प्रत्याहार सूत्रों का मुख्य कार्य:**– वर्ण-समूहों को संक्षिप्त नाम देकर, व्याकरणिक नियमों में उनका प्रयोग करना। इससे सूत्रों की भाषा अत्यंत संक्षिप्त, वैज्ञानिक और स्मरणीय बन जाती है। प्रत्याहारों के माध्यम से पाणिनि ने वर्णसमूहों के लिए एक प्रकार की विशेष प्रकार कि प्रणाली विकसित कि है जिससे सूत्रों का विस्तार और पुनरावृत्ति टल गई।

* वर्ण-समूहों का संक्षिप्त उल्लेख।

* सूत्रों की संक्षिप्तता और स्पष्टता।

* सूत्रों की स्मरणीयता और प्रयोग में सुविधा।

**प्रत्याहारों की सूची:**

पाणिनि ने अपने व्याकरण में लगभग 41प्रत्याहारों का ही प्रयोग किया है ।

एक प्रत्याहारउणादिपाठ में, एक प्रत्याहारवार्तिक में तथा भाष्यटीकाकारों के मत में एक प्राप्त होते हैं।

**<u>* पाणिनिकेमतमेप्रत्याहार</u>**

पाणिनि ने शास्त्र की प्रवृत्ति के लिए 41प्रत्याहारों की कल्पना की है। जयादित्यवामान नेवर्णसमाम्नायकेअनुबंधोकेआधारपर प्रस्तुत कारिका के द्वारा सभी पाणिनीयप्रत्याहारों का परिगणनकिया है। यथा-

**<u>"एकस्मान्ङञणवटाद्वाभ्यांषस्त्रिभ्यएवकणमाःस्युः ज्ञेयौचयौचतुर्भ्योरःपञ्चभ्यःशलौषड्भ्यः"</u>**[4]

पाणिनि के मतानुसारवर्णोंकेआधारपर ४१ प्रत्याहार- अकार वर्ण से आठप्रत्याहार– अण्, अक्, अच्, अट्, अण्, अम्, अश्, अल्

3. महाभाष्य १.१.२ 4. काशिकावृत्तिः १.१

इकार से तीन - इक्, इच्, इण्। उकार से एकः- उक्। एकार से दो:- एङ्, एच्। ऐकार से एक—ऐच्। हकार से दो—हश्, हल्। यकार से पाँच—यण, यम्, यञ्, यय्, यर्। वकार से दो—वश, वल्। रेफ से एक—रल्। मकार से एक—मय्। ङकार से एक—ङम्। झकार से पाँच—झष्, झश्, झय्, झर्, झल्। भकार से एक—भष्। जकार से एक–जश्। बकार से एक— बश्। छकार से एक—छव्। खकार से दो—खय्, खर्। चकार से एक—चर्। शकार से दो—-शर्, शल्

**<u>* पाणिनिसेइतर आचार्योंकेमतमेप्रत्याहार:-</u>**

**<u>* र प्रत्याहार:- </u>**महाभाष्य के टीकाकार भर्तृहरि एवं कैय्यट ने लकार को अनुनासिक मानकर उसकी इत्संज्ञा करके र प्रत्याहार को स्वीकार किया है जैसा कि भर्तृहरि ने कहा है कि -

**"प्रत्याहारे रट लणितिलकारेयोऽकारअसावनुनासिकःप्रतिज्ञास्यते। अतःस्वेनान्येनेतरदितिरेफआदिस्तन्मध्यस्थस्यापि संज्ञा भविष्यतीति'उरणरपरः' इति रेफःतन्मध्यस्थंतकारंप्रत्यायति** [5]"

तथा भर्तृहरि के इसी वाक्य को आधार मानकर कैय्यट ने महाभाष्य के प्रदीप टीका में में लिखा-

**रपरइत्यत्र र इति लणितिलकारेणप्रत्याहारआश्रीयते** [6]

किन्तु इसके विपरीत नागेश भट्ट उद्योत टीका में लिखा है कि -यदि र प्रत्याहार होता तो **उरणरपर:** [7] इस सूत्र के समान ही तो **अतोॢान्तस्य** [8] इस सूत्र कि जगह पर अतोरान्तस्य इस सूत्र का ग्रहण करने से ही लकार एवं रकार का ग्रहण हो जाता पुनः इस सूत्र में लकार का उच्चारण क्यों किया गया . पाणिनि के उक्त सूत्र कि कल्पना गौरव ग्रस्त हो जाती .

**<u>* चय्प्रत्याहार :- </u>**यकार अनुबंध से चार प्रत्याहारों का पाणिनि ने उल्लेख किया- यय् ,मय् ,झय्,खय् - किन्तु इससे अतिरिक्त यकारानुबंध से वर्तिककार ने चय्प्रत्याहार का उल्लेख किया है . वार्तिककार के अनुसार आचार्य पौष्कर केमत में शर्प्रत्याहार यदि बाद में हो तो चय्प्रत्याहार के वर्ण द्वितीय वर्ण वाले हो जाते है [9]

जैसे – च ,ट,त,क,प, को छ,ठ,थ,ख,फ हो जाते है जिसे वत्सर: का वथ्सरः एवं अप्सरा: का अफ्सरा:उच्चारण होता है .वस्तुतः पाणिनि ने लोक संस्कृत में ना प्रचलित होने के कारण इस प्रत्याहार पर विचार नहीं किया।

**<u>* ञम्प्रत्याहार</u>**:-वसुदेव दीक्षित ने ञम प्रत्याहार कि कल्पना कि है . उनके अनुसार "**ञमन्ताड्डः**" [10] ञम् वर्णान्तधातुओ को **ड** प्रत्यय होता है . जिससे दण्डः ,खण्डः,षण्ड: पद बनते है. वस्तुतः पाणिनि ने इन शब्दों कोअव्युत्पन्न माना है अर्थात- उनके अनुसार ये रुढ शब्द है . इसलिए पाणिनि ने इन शब्दों को **उणादयो बहुलम्** के द्वारा उल्लेख कर दिया .

*** पाणिनीय प्रणाली में प्रत्याहारों का महत्व:-**

**संक्षिप्तता और स्मरणीयता** : पाणिनि की अष्टाध्यायी की सबसे बड़ी विशेषता उसकी संक्षिप्तता और वैज्ञानिकता है। प्रत्याहारों के प्रयोग से पाणिनि ने वर्ण समूहों, प्रत्यय समूहों आदि का उल्लेख अत्यंत संक्षिप्त और स्पष्ट रूप में किया। इससे सूत्रों की संख्या, शब्दों की पुनरावृत्ति में भारी कमी आई।

**सूत्र-रचना में प्रत्याहारों की भूमिका :**

5. महाभाष्य१.१.४ 6. महाभाष्य प्रदीप टीका १.१ 7. पाणिनीय अष्टाध्यायी १.१.५१ 8. पाणिनीय अष्टाध्यायी ७.२.२
9. चयोद्वितीयाःशरिपौष्करसादेरितिवाच्यम्" 10. उणादिपाठ १.१११

प्रत्याहारों ने सूत्र-रचना को अत्यंत संक्षिप्त, संगठित और प्रभावी बना दिया। उदाहरण के लिए, "इकोयणचि" जैसे सूत्र में तीन प्रत्याहारों (इक्, यण, अच्) के प्रयोग से एक ही सूत्र में जटिल ध्वनि-परिवर्तनों का नियम स्पष्ट हो जाता है। यदि प्रत्याहारों का प्रयोग न होता, तो सूत्र अत्यंत दीर्घ और जटिल हो जाते।

**प्रत्याहारों के बिना सूत्र-रचना:**प्रत्येक वर्ण या प्रत्यय का नाम बार-बार लिखना पडता ,सूत्रों की संख्या और जटिलता बढ जाती,स्मरण और प्रयोग में कठिनाई होती।

**प्रत्याहारों के साथ सूत्र-रचना:** संक्षिप्त एवंस्पष्ट सूत्र ,स्मरणीयता और प्रयोग में सुविधा,व्याकरणिक नियमों की तार्किकता ।

**<u>* वर्णसमाम्नायसेअसंबंधप्रत्याहार:-</u>**

वर्णसमाम्नाय से असंबंध प्रत्याहारों को दो प्रकार से विभक्त करसकते है.

* प्रथम-पाणिनीय सूत्रों से संबंधित- सुप् ,सुट् ,आप् ,तिङ् ,तङ्

* द्वितीय-पतञ्जलिद्वारा कल्पित- उम् ,कृञ् ,तृन् ,मात्रच् ,सङ् ,यङ्

*** पाणिनीय सूत्रों से संबंधित प्रत्याहार:-**

*** सुप्** :- **स्वौजसमौड्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्** [11] इस सूत्र के आरम्भ के सुसे लेकर अन्त पकारतक सुप्प्रत्याहार माना जाता है ।

*** सुट्** :- उपर्युक्त सुप्प्रत्याहार के अन्तर्गत आदि सुसे लेकर औट्वकसुट्प्रत्याहार माना जाता है. इस प्रत्याहारों सेसु, औ, जस्, अम्, औट् इन पांच प्रत्ययों का बोध होता है .**सुडनपुंसकस्य** [12] इस सूत्र में सुट्प्रत्याहार का उल्लेख हुआ है ।

*** आप्** :- टाप्रत्यय के आ से लेकर अन्तिम प्रत्यय सुप्के पकारतक आप्प्रत्याहार होता है । इसका उल्लेख **अनाप्यकः**[13] सूत्र के प्रसंग मे मिलता है ।

*** तिङ्** :-**तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्**[14] इस सूत्र के आदिप्रत्यय तिप्के तिसे लेकर महिङ्केङकार तकतिङ्प्रत्याहार होता है । इस प्रत्याहार के माध्यम से अट्ठारहप्रत्ययों का बोध हो जाता है ।

*** तङ्** :- यह प्रत्याहार पूर्व सूत्र के अन्तर्गत हि होता है । यहत्से लेकर महिङ्केङकार तक होता है । इस का प्रयोग केवल **तङानावात्मनेपदम्** [15] इस सूत्र में हुआ है ।

*** पतञ्जलिद्वाराकल्पितप्रत्याहार:-**

*** उम्** :- यह प्रत्याहार **स्थानिवदादेशोऽनल्विधौ** [16] इस सूत्र के भाष्य मे मिलता है । उम्प्रत्याहार **तनादिकृञ्भ्यउः**[17] सूत्र के उकार से लेकर **इदितोनुमधातोः** [18] सूत्र के भ कारतक है । जिसके अन्तर्गत वसु आदि प्रत्ययों का बोध होता है ।

*** कृञ** :- कृञ्चानुप्रयुज्यते लिटि इस सूत्र के भाष्य कि कल्पना मे कृञ्प्रत्याहार का वर्णन करते है । **कृञ्प्रत्याहारकृभ्वस्तियोगेसंपद्यकर्तरिच्विः**[19] के कृ से लेकर **कृञोद्वितीयतृतीयशम्बीजात्कृषौ** [20] इस सूत्र के ञकारतक होता है ।

---

11. पाणिनीयअष्टाध्यायी ४.१.२ 12. पाणिनीयअष्टाध्यायी१.१.४२ 13. पाणिनीयअष्टाध्यायी ७.२.११३

14. पाणिनीयअष्टाध्यायी ३.४.७८ 15. पाणिनीयअष्टाध्यायी १.६.१०० 16. महाभाष्य १.१.५६

17. पाणिनीयअष्टाध्यायी३.१.७९ 18. पाणिनीयअष्टाध्यायी७.१.५८ 19. पाणिनीयअष्टाध्यायी ५.४.५ 20. पाणिनीयअष्टाध्यायी ५.४.५८

जिस के द्वारा एधाञ्चक्रे, एधाम्बभूव आदि पदों कि सिद्धि होती है ।

* **तृन्** :- भाष्यकार **नेलटःशतृशानचावप्रथमासमानाधिकरणे** [21] सूत्र के तृ से लेकर **तृन्** [22] सूत्र के नकारतक तृन्प्रत्याहार कि कल्पना कि है ।

* **सङ्** :- इस प्रत्याहार का कल्पना भाष्यकार ने **गुप्तिज्किद्भ्यःसन्** [23] इस सूत्र के सकार से लेकर **तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्** [24] सूत्र के ङकारतक सङ्प्रत्याहार माना है ।

* **यङ्** :- **व्यत्ययोबहुलम्** [25] इससूत्रकेभाष्यवार्तिकमेइसप्रत्याहारकावर्णनकियागयाहै. यङ्प्रत्याहार**सार्वधातुकेयक्**[26] इससूत्रकेयकारसेलेकर**लिङ्याशिष्यङ्** [27] इससूत्रकेङ्कारतकहोताहै। इसप्रत्याहारकेअन्तर्गतशप् ,श्यन् ,आदिसभीतिङ्विकरणप्रत्यय आ जातेहै।

*** अन्य व्याकरण परंपराओं में प्रत्याहारों की स्थिति:-**

पाणिनि से अन्य व्याकरण परंपराओं में प्रत्याहार अवश्य पाए जाते हैं, किन्तु प्रायः उनकी रचना में माहेश्वर सूत्रों एवं पाणिनीय प्रत्याहारों के स्थान पर अपने-अपने वर्णक्रम प्रत्याहारों की संख्या, सीमा और अंतर होते हैं। यथा –

* **कातन्त्र व्याकरण**- इस व्याकरण में तो प्रत्याहार पद्धति का अभाव प्राप्त होता है

* **शाकटायन व्याकरण**- १३ सूत्र वर्णसमाम्नायसंबंधितएवं २९ प्रत्याहारप्राप्तहोतेहै. जिसमे ६ प्रत्याहारपाणिनिसेभिन्नहै .

* **मुग्धबोधव्याकरण**-इसमे १० सूत्रवर्णसमाम्नायसंबंधितहैतथा २४ प्रत्याहारहैजिसमे १६ प्रत्याहारपाणिनिसेभिन्नहै .

* **सुपद्मव्याकरण**-इसमे १३ सूत्रवर्णसमाम्नायसंबंधितहैतथा २३प्रत्याहार हैजिसमे १प्रत्याहार पाणिनिसेभिन्नहै .

**निष्कर्ष :-**

पाणिनि का प्रत्याहार-विधान व्याकरण विज्ञान की संक्षिप्तता, विस्लेषणीयता, और व्यावहारिकता का अभूतपूर्व उदाहरण है। पाणिनि की प्रत्याहार प्रणाली संस्कृत व्याकरण का मूलाधार है। इन प्रत्याहारों के माध्यम से पाणिनि ने वर्ण-समूहों, प्रत्यय-समूहों आदि का संक्षिप्तव संगठितउल्लेख किया जिससे अष्टाध्यायी विश्व का सबसे संक्षिप्त, संगठित और प्रभावी व्याकरण ग्रंथ बन सका। प्रत्याहारों की संक्षिप्तता, स्मरणीयता, और वैज्ञानिकता आज भी भाषाविज्ञानियों के लिए प्रेरणास्रोत है। आधुनिक भाषाविज्ञान में प्रत्याहार प्रणाली की उपयोगिता, सीमाएँ और आलोचना – ये सभी बिंदु पाणिनि की अद्वितीयता और दूरदर्शिता का प्रमाण हैं। प्रत्याहारों के बिना न तो पाणिनि का व्याकरण इतना संक्षिप्त और संगठित हो सकता था, न ही संस्कृत व्याकरण का अध्ययन इतना सरल और वैज्ञानिक बन पाता। पाणिनि द्वारा निर्दिष्टचतुर्दशमाहेश्वर सूत्रों से उपजे ४१ प्रत्याहार, व्याकरण शास्त्र के संक्षिप्ततम एवं सर्वाधिक कार्यसाधक हैंइनके बिना न अष्टाध्यायी संभव थी, न प्राचीन से आधुनिक भाषाविज्ञान का संगम ।

*** सन्दर्भ ग्रन्थ सूची:-**

---

21. पाणिनीयअष्टाध्यायी ३.२.१२४ 22. पाणिनीयअष्टाध्यायी ३.२.१३५ 23. पाणिनीयअष्टाध्यायी ३.१.५
24. पाणिनीयअष्टाध्यायी ३.४.७८ 25. पाणिनीयअष्टाध्यायी ३.१.८५ 26. पाणिनीयअष्टाध्यायी ३.१.६७
27. पाणिनीयअष्टाध्यायी ३.१.८६

*** मूल ग्रन्थ :-**

1. पाणिनीयअष्टाध्यायी 2. कातन्त्र व्याकरण 3. काशिका वृत्ति

*** सहायक ग्रन्थ :-**


1. शर्मा,गिरिधरएवं परमेश्वरानन्दशर्मा ."वैयाकरणसिद्धान्तकौमुदी".दिल्ली :मोतीलाल बनारसीदास,२०१२.
2. तिवारी,हरिनारायण."व्याकरणमहाभाष्यम्" .वाराणसी:चौखम्बाविद्याभवन, २०१२.
3. पाण्डेय,रामनारायणदत्त."लघुसिद्धान्तकौमुदी".गोरखपुर:गीताप्रेस.२०१७
4. दीक्षित,पुष्पा."पाणिनीयधातुपाठ".नवदेहली:संस्कृतभारती.२०१०
5. पाण्डेय,उपेन्द्र."पाणिनीयप्रत्याहारसमीक्षा" .वाराणसी:उत्कर्ष प्रकाशन.१९९७
6. मीमांसक,युधिष्ठिर."संस्कृत व्याकरण शास्त्र का इतिहास" .सोनीपत:रामलाल कपूर ट्रस्ट प्रेस.१९८५


************************

**ISSN 2250-1711**
**Journal of Veda Samskrita Academy**
**A National Peer-Reviewed Research Journal**
**Volume : XXVI, July to December-2025**

# अप्पय्यदीक्षितानाम् भारततात्पर्यसङ्ग्रहः

**श्रीमति चैत्र बि .एन्**
संशोधनविद्यार्थिनि ,साहित्यविभाग:
कर्णाटक-संस्कृत-विश्वविद्यालय:
चामराजपेटे, बेङ्गळूरु-560018
Phone– 9480501372
Email- chaitranagara@gmail.com

**उपोद्घात: -**

'अपारे काव्यसंसारे कविरेव प्रजापति:' इत्युक्त्यनुसारेण अस्मिन्जगति कविरेव ब्रह्मा भवति । यादृशं स: इच्छति तादृशं लिखति । अनया रीत्या कवय: बहून्ग्रन्थान्लखित्वा काव्यसागरमेव कृतवन्त: । साहित्यं नाम शब्दार्थयो: सहितभाव: । सोऽपि कमपि विषयमधिकृत्य प्रवर्तते । यस्य कस्यापि समुदायस्य उत्कर्षापकर्षौ अनेन वयं जानीमहे संस्कृतसाहित्यं द्विधा विभक्तम् ।

*** वैदिकम् * लौकिकम्**

अलौकिकसाहित्ये वेदाः तेषां शिक्षादीनि अङ्गानि आयुर्वेदादय: उपवेदाः न्यायादीनि विविधशास्त्राणि च अन्तर्भवन्ति । लौकिकसाहित्ये काव्यानि अन्तर्भवन्ति । अस्या: साहित्यविद्याया: अलङ्कारशास्त्रं काव्यशास्त्रम् इत्यादीनि नामान्तराणि बहूनि वर्तन्ते । काव्यसाहित्येऽपि बहवः प्रकाराः सन्ति । तत्र दृश्यकाव्यानि श्रव्यकाव्यानि इति च प्रमुखतया भागद्वयं वर्तते । अभिनययोग्यानि नाटकादीनि दशरूपकाणि दृश्यकाव्येषु अन्तर्भवन्ति । श्रव्यकाव्यं च गद्यं पद्यंचम्पू इति त्रिधा विभक्तम् । एतादृशा: काव्यप्रकारा: संस्कृतवाङ्मये अपरिमितं प्रणीता: दृश्यन्ते ।

**महाभारतम् -**

रचितकाव्येषु सकलविषयमूलौ भारतीयसंस्कृत्या: प्रधानभूतौ ग्रन्थौ रामायणमहाभारतमहाकाव्यौ । रामायणमहाकाव्ये रघुवंशस्थराजादीनां कथा वर्तते । तस्य रचयिता आदिकविवाल्मीकि:, तेन रचितप्रसिद्ध- महाकाव्यं रामायणम् । महर्षिव्यासेन भणितं गणेशेन लिखितं महाभारतं, एवं एतयो: ग्रन्थयो: रचना अभूत् । अविरामे परिश्रमे आत्मानं विनियोज्य महर्षिव्यासेन ग्रन्थोऽयं त्रिभिर्वर्षै: समापितम् इति आदिपर्वस्थश्लोके उक्तं वर्तते [1] । अस्य ग्रन्थस्य उद्देश्यं न तु कौरवपाण्डवयो: समरस्य वर्णनम् ; अपि तु भारतीयधर्मस्य, सीमाया:, परम्पराया:, राजनैतिकविषयाणां, जनाङ्गस्य च कृत्स्नेन वर्णनम् ।

अस्य ग्रन्थस्य त्रीणि वाचनानि सञ्जातानि । प्रथमं हि व्यासेन शुकवैशम्पायनाधिभ्यो श्रावितमिदं जयसंज्ञकम् । पाण्डवानां विजयत्वात्जयमिति नाम आगतम् इत्यपि कथयन्ति । जयग्रन्थे ८८०० श्लोका: सन्ति इति कथयन्ति । तत: वैशम्पायनेन जनमेजयाय कथितं भरतवंशस्य सम्बद्धत्वात्च भारतमित्यपि कथयन्ति । भारतग्रन्थे २४००० श्लोका: आसन् इत्युक्ति: प्रसिद्धम् ।

---

1. त्रिभिर्वर्षै: सदोत्थायी, कृष्णद्वैपायनोमुनि: । महाभारतमाख्यानं, कृतवानिदमुत्तमम् ॥ इति

ततश्च इदं काव्यं सौतिना शौनकादया: श्राविता: । हरिवंशमेव महाभारते प्रधानं तत् आदाय महाभारते ९६२४४ श्लोका: सम्मता: । महाभारतग्रन्थम् आधारीकृत्य बहव: रचना: जाता: । भारतीय–संस्कृतसाहित्यस्य सर्वश्रेष्ट: ग्रन्थ: श्रीमद्भगवद्गीता अस्यैवांश:। विष्णुसहस्रनाम, अनुगीता, भीष्मस्तवराज:, गजेन्द्रमोक्षा, अर्जुनकृतदुर्गास्तव:, स्कन्दस्तव: इत्यदया: स्तोत्रकाव्या: महाभारतोपजीव्यरचना: । शिशुपालवधम्, नैषधीयचरितम्, किरातार्जुनीयम् एतानि उपजीव्यमहाकाव्यानि । नलचम्पू, भारतचम्पू, द्रौपदिपरिणयचम्पू इत्यदया: महाभारतोपजीव्यचम्पुकाव्यानि । महाभारतोपजीव्यनाटकानि अभिज्ञानश्कुन्तलं, कर्णभारं, दूतवाक्यम् इत्यादया: । महाभारतमधिकृत्य मध्वाचार्य:, अप्पय्यदीक्षित:, इत्यादया: दार्शनीका: बहून्ग्रन्थान्लिखित-वन्त: । अप्पय्यदीक्षितेन भारततात्पर्यनिर्णयमिति ग्रन्थ: लिखित: । तस्य विचार: यथावकाशं यथामति अत्रोपस्तापयामि ।

**अप्पय्यदीक्षित: -**

८. यो हत्वाहिमरिणात्सप्त सिन्धून्यो गा उदाजदपधा बलस्य। यो अश्मनोरन्तरग्निं जजान संवृक्समत्सु स जनास इन्द्रः॥ (ऋग्वेद २.१२.३)

९. अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत। स देवाँ एह वक्षति॥ (ऋग्वेद १.१.२)

१०. अग्निना रयिमश्नवत्पोषमेव दिवेदिवे। यशसं वीरवत्तमम्॥ (ऋग्वेद १.१.३)

११. अग्निर्होतानो अध्वरे वाजी सन्परिणीयते। देवो देवेषु यज्ञियः। (ऋग्वेद ४.१५.१)

१२. परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत्। दधद्रत्नानि दाशुषे। (ऋग्वेद ४.१५.३)

१३. आ यस्मिन्त्सप्त रश्मयस्तता यज्ञस्य नेतरि। मनुष्वद्दैव्यमष्टमं पोता विश्वं तदिन्वति॥ (ऋग्वेद २.५.२)

१४. अग्निं दूतं वृणीमहे होतारं विश्ववेदसम्। अस्य यज्ञस्य सुक्रतुम्॥ (ऋग्वेद १.१२.१)

१५. अग्निर्देवाँ इह वक्षति। (ऋग्वेद १.१.२)

१६. आग्निं न स्ववृक्तिभिर्होतारं त्वा वृणीमहे । यज्ञाय स्तीर्णबर्हिषे वि वो मदे शीरं पावकशोचिषं विवक्षसे ॥ (ऋग्वेद १०.२१.१)

१७. सप्तते5अग्ने समिधः सप्तजिह्वाः सप्त5ऋषयः सप्तधाम प्रियाणि। सप्तहोत्राः सप्तधात्वा यजन्ति सप्त योनीरापृणस्व घृतेन स्वाहा ॥ (यजुर्वेदे १७.७९)

****************************************

**ISSN 2250-1711**
**Journal of Veda Samskrita Academy**
**A National Peer-Reviewed Research Journal**
**Volume : XXVI, July to December-2025**

# श्रीभूवलयग्रन्थस्य कर्ता कुमुदेन्दुमुनिः

**शिवनन्दिनी**
शोधच्छात्रा, कर्नाटक संस्कृत विश्वविद्यालयः
चामराजपेटे, बेंगळूरु, कर्नाटक -560018
Contact Number: 8086966484
E-mail : shivanandini98@gmail.com

श्रीकुमुदेन्दुमुनिः, यः सिरिभूवलयस्य अद्भुतस्य ग्रन्थस्य रचयिता, सः कर्णाटकराज्यस्य चिक्कबल्लापुरमण्डलस्य नन्दीदुर्गदुर्गसमीपे स्थिते यलवल्लीग्रामे जन्म प्राप्तवान् इति परम्परया ज्ञायते। एतत् ग्रामम् अद्यापि तेनैव नाम्ना प्रख्यातम् अस्ति, तत्र च स्थानीयजनानां स्मृतिषु मुनिः सजीवः एव अस्ति। तस्य स्मरणं जागरूतं रक्षितुं तत्रत्यैः युवकैः 'कुमुदेन्दु युवक सङ्घ' इति नामकः समूहः स्थापितः, यः तस्य नाम्नि सामाजिक-सांस्कृतिककार्यक्रमान् आचरति।

तस्य ऐतिहासिकत्वं प्रमाणयितुं तत्र बहूनि स्थलानि सन्ति। जनाः एकं प्राचीनकूपं दर्शयन्ति, यस्मात् मुनिः स्वपूजनार्थं जलम् उद्धरति स्म इति परम्परा। तथैव ते तं भूभागम् अपि निर्दिशन्ति यत्र मुनेः वासस्थानम् आसीत्। कालक्रमेण तत्स्थलं अन्यस्य स्वामित्वे अस्ति, परं तत्रत्याः जनाः तं मुनिं स्वपूर्वजत्वेन गर्वेण स्मरन्ति। अद्य तस्मिन् गृहे कोऽपि न वसति, तस्य वंशजाः इतिहासेन विस्मृता बेङ्गळूरुनगरे निवसन्ति।

एतत् सर्वं वृत्तान्तं मया प्रत्यक्षरूपेण तस्मिन् ग्रामे भ्रमणकाले स्थानीयनिवासिभ्यः श्रुतम्। मां तत्र प्रति नेतुं बेङ्गळूरुनगर्याः श्रीमती पद्मिनी पद्मराज् (अखिलकर्णाटकमहिला-ऐक्यसंघस्य अध्यक्षा) तथा श्रीअभिनन्दनः (बेङ्गळूरुविकासप्राधिकरणस्य राजस्वसर्वेक्षणाधिकारी) इति महानुभावौ उद्युक्तौ आस्ताम्। एतैः तथ्यैः कुमुदेन्दुमुनेः ऐतिहासिकसत्त्वं दृढतरं भवतिइति"श्रीभूवलयसिद्धान्तस्य 'मङ्गलपाहुडम्' इति ग्रन्थस्य विवरणं भाष्यकर्त्री डॉ. तेजस्विनी देशपाण्डे उल्लिखितवती।"[1]

श्रीकुमुदेन्दुमुनिः आचार्यवीरसेनं राजानम् अमोघवर्षं च बहुवारं स्मरति। एतत्कारणात् बहवः जनाः अस्य मुनेः कालं नवमशतकम् इति मन्यन्ते। परं तु अद्यतनाः विद्वांसः तस्य रचनाशैलीं दृष्ट्वा अयं पञ्चदशशतकस्य मुनिः आसीत् इति मन्यन्ते।

आचार्यवीरसेनस्य शिष्यप्रशिष्याणां विषये 'दर्शनसार'ग्रन्थे देवसेनाचार्येण त्रिंशत्तम्याः गाथायाः द्वात्रिंशत्तम्याः गाथापर्यन्तं 'काष्ठसंघ'स्य उत्पत्तिविषये निर्दिष्टम् अस्ति। तत्र वीरसेनः, जिनसेनः इत्यादयः आचार्याः उल्लिखिताः सन्ति, परं तेषु कुमुदेन्दुमुनेः उल्लेखः नास्ति।

आचार्यः (कुमुदेन्दुः) दशमशतके विद्यमानस्य इन्द्रनन्द्याचार्यस्य 'नीतिसार'ग्रन्थस्य 'मङ्गल पाहुड'ग्रन्थस्य अष्टादशाध्यायतः

1. सिरिभुवलयसिद्धान्तदमङ्गलपाहुडवु, पृ-२१

द्वात्रिंशाध्यायपर्यन्तं उल्लेखं कृतवान् अस्ति। अनेन निश्चितं भवति यत् सः दशमशतकात् परवर्ती आसीत्। माघनन्द्याचार्येण रचितस्य 'शास्त्रसारसमुच्चय'ग्रन्थस्य श्लोकाः, तथा 'नियमसार'ग्रन्थस्य टीकां लिखितवतः पद्मप्रभमलदारिदेवस्य संस्कृतश्लोकाः अपि अस्य 'सिरिभूवलय'ग्रन्थे प्राप्यन्ते। एतयोः आचार्ययोः कालः द्वादशशतकम् (12th century) आसीत्।

श्रीशर्ववर्मणा रचितस्य 'कलाप कातन्त्र व्याकरण'स्य टीकां भावसेनत्रैविद्यः अरचयत्। तस्य मङ्गलश्लोकाः अपि अस्मिन् ग्रन्थे दृश्यन्ते। भावसेनस्य कालः त्रयोदशशतकस्य (13th century) मध्यभागः आसीत्।

तथैव ग्रन्थस्य ऊनषष्टितमे (59) अध्याये तृतीयमङ्गरसस्य उल्लेखः कृतः अस्ति। तृतीयमङ्गरसः क्रि.श. १५०८ तमे वर्षे (सन् 1508) आसीत्। एतत्कारणात् सः (कुमुदेन्दुः) षोडशशतकात् (16th century) पूर्ववर्ती न आसीत् इति निश्चितं भवति।

द्वितीयखण्डे 'श्रुतावतारे' तृतीयमङ्गरसेन या सरस्वत्याः स्तुतिः कृता, तस्याः उल्लेखः अपि अस्ति इति निर्दिष्टम् अस्ति। मङ्गरसः क्रि.श. १५०८ तमे वर्षे चेङ्गाळ्व (चेङ्गाळ्व) राज्ञां काल आसीत्।

द्वितीयखण्डे प्राप्यमानः तृतीयमङ्गः सरस्वत्यवतारानन्तरं आगतानां त्रयाणां पङ्क्त्यां (श्लोकानां) अस्ति। एरडने खण्डद् बरुव मूरणे मंग सरस्वतियवतारादंतरर मूरु सालिनंग।

गर्भदे बरुवंक सरणी माँगलिकमङ्गरसेन विरचितेषु काव्येषु दृश्यमानानि सरस्वतीस्तोत्राणि

वाणि! वीणापाणि संसारसागर द्रोणि! परधृतवाणि!घनदुरितवल्लीकृ
पाणि निश्रेयोद्ध मार्ग निश्रेणियंगजदन्दशूकवेणी ।
एणलोलविलोचने पेणकुलक्के कट्टाणि कल्याणि वाक् श्रेणी जिनमुखजनित ।
वाणी शास्त्रक्षोणिमाणदेन्नेदेयल्लि नेलसी सन्मतियीवुदु ॥७॥[2]
नव कवीश्वर विकसितानन घटंगलोळु नवरसवनिट्टु परिणिते प्रेक्षे मोदलाद
विविध परिकरमनोडगलेसि बळिकवर नालगेयेम्ब दर्विविडिदु
तवे पाकमं माडि रसिकजनसंततिय किविगे तीवुव भारतीदेवियं नेनेदु
सविवडेद षड्रसविपाकभेदमनेन्न बल्लंददिं पेल्वेनु ॥२॥[3]
वाणी वृजिनघनतर कांतार कृ पाणी संसारवारिधिगे
द्रोणि निल निःश्रेयोमार्ग निः श्रेणिगे नानेरगुवेनु ॥8॥[4]
परमब्रह्महृदयसरसिरुहो ।
दरदोळगोगेदातन सिरिमोगदोळु गरुविकेदाळि नेरेदु कैवल्यसतिगे सहचरियागि ।
भरदिं भव्यभुजंगरनवळोळ नेरपुव कोविदे नरसुरवंदिते ।
तरुणीमणि भारति मन्मतिगीवुदु मांगल्य ॥7॥[5]

---

2. सम्यक्त्वकौमुदिप्रथमसन्धि, श्लोकः- ७ 3. सूपशास्त्र, श्लोक – २ 4. नेमिजिनेशसंगतिद्वितियश्लोकः

5. मंगरसकवि प्रणीतं जयनृपकाव्यं प्रथमसंधि (परिवर्धिनी षट्पदि)अष्टमश्लोकः

मङ्गरसतृतीये सम्यक् कौमुदि ग्रन्थे कुमारेन्दु मुनिं स्मरति।

वंदिसुवे नानु मुददिंद गौतमदेव । नंदि गुणभद्र जिनसेनरावुलकोंड

कुंद भुजबलि हेमदेव मुनिचंद्र पद्मप्रभ मयूरपिंछि ॥

नंदिमित्र समंतभद्र केशव माघ –

णंदियकळंक विकळंक भद्रबाहु कुमु-

देंदु प्रभेंदु मोदलाद सूरिगळ पदमं नेनेदु सुखियप्पेनु । ।

किंतु एषः कुमुदेन्दु मुनिः त्रयोदशशताब्दे स्थितः आसीत्।

कुमुदेन्दु रामायणग्रन्थे स्मृताचार्याणां नामानि एतानि –

1. कुन्दकुन्दाचार्यः, समन्तभद्रस्वामी, कविपरमेष्ठी,गुणभद्रस्वामी, उमास्वातिः, श्रीपादस्वामी, श्रीपूज्यपादस्वामी, अकलङ्कदेवाचार्यः, विद्यानन्दः, अनन्तवीर्यः, वीरसेनाचार्यः, जिनसेनाचार्यः, भूतबलिः, पुष्पदन्तः, सिंहनन्द्याचार्यः, प्रभाचन्द्रः, श्रीवर्धमानभट्टारकः, श्रीधराचार्यः, वासुपूज्यः, अभयचन्द्रः, माघनन्दिः, बालचन्द्रमुनिः, गुणवर्मा, जयवर्मा, गजगः, गुणनन्दिः, नयवर्मा, होन्नः, पम्पः, रन्नः, मनोबाणः, जन्नः ,कुमुदचन्द्रः, जन्नः ।

कवेः कालः क्रि.श. ११५०-१२५० भवेत्। माघनन्दिनः कालः क्रि.श. १२६५। माघनन्दी तस्य गुरुः नासीत्। किन्तु कुमुदेन्दुरामायणे उल्लेखात् अयं प्रायेण त्रयोदशशतकस्य अन्तिमभागे आसीत् इति बहुभिः ऊह्यते।

अतः रामायणकाव्यं रचितवान् यः कुमुदेन्दुः, श्रीभूवलयग्रन्थं रचितवान् यः कुमुदेन्दुः, तयोः भिन्नत्वम् एव इति निश्चयः। सः त्रयोदशशतकस्य कुमुदेन्दुः, षोडशशतकस्य कुमुदेन्दुश्च — इयोः द्वयोः शैलीषु सादृश्यं दृश्यते।

रामायणे कुमुदेन्दोः नाम्नः उल्लेखः अनेकसु स्थानेषु अस्ति — ‘कुमुदेन्दुः स्वयम् एव प्रतिपादयति — अहं मुनीश्वरः, कविराजशिखामणिः, चरितकविः, सज्जनसुकविः च’ इति।

इदानीं प्राप्यते यत् काव्यं — ‘कुमुदेन्दुहरं वज्रप्रतिष्ठाकल्परिर्पणम्’ इति — अस्य संग्रहप्रथमदेशकः (भागः) एव...।

श्रीभूवलये अपि कुमुदेन्दोः नाम्नः उल्लेखः अनेकसु स्थानेषु अस्ति — “विरचयति कुमुदेन्दुर्गुरुर्यः, श्रीकौमुदीन्दुमुनिना निर्मापितं यलवभूमिरिदम्” इति।

"रीतियख्यातियोळ कुमुदेन्दु" - प्रकीर्त्याः रीतेः प्रसिद्धौ च कुमुदेन्दुः।

"दायदि कुमुदेन्दु मुनि" - दातृत्वेन कुमुदेन्दुमुनिः।

"गुरुवीरसेनर शिष्य कुमुदेन्दु" - गुरोः वीरसेनस्य शिष्यः कुमुदेन्दुः।

कुमुदेन्दुरामायणग्रन्थे सिरिभूवलयग्रन्थे च "सिद्धरस" (आयुर्वेदीयः) इति पदेन सह वर्तमानं साम्यं द्रष्टुं शक्यते।

"दोरये सुवर्णं तेये मळयजं बेरेसे दशांगं तेगये कुसुमधृति

करगिसे सिद्धरसं खंडिसे पुंडेक्षुव कांडचयं परिमर्दिसे हिमकुंकुममृगमद

वोरसे कर सांदिन पुणुगिन घन परिमळमेने मत्नति माडुगु चमत्नतियं संघर्षिसलु ॥42॥

सिरिभूवलयग्रन्थे सिद्धरसस्य उल्लेखः अनेकत्र कृतः।

प्रथमे अध्याये एकविंशतितमे (५१तमे) काव्ये लिखितम् –

“सिद्धरसं कृत्वा पुष्पान् नाशयति, बुद्धेः ज्ञानं च क्षिणं करोति” इति।

चतुर्दश अद्याये-

रसवनु हू हूविनिं मर्दिसि पुटविट्ट होस रस घुटिकेय कुट्टि।

रससिद्धियागे सिद्धान्त रसायन होस कल्पसूत्र वैद्यवद् ॥

अनेन प्रकारेण त्रयोदशशताब्दे स्थित कुमुदेन्दोः षोडशशताब्दे स्थित कुमुदेन्दोः च अनेकानि साम्याणि वर्तयितुं शक्यन्ते।

उपसंहारः

अस्माद् ज्ञायते यत् षोडशशताब्दौ आसीत्, न तु अष्टमशताब्द इति। यतो हि मङ्गरसस्य (माङ्गरस्य?) तृतीयस्य कालः ख्रीष्टाब्दैः पञ्चदशशतकं वर्तते। श्रीभूवलयस्य प्रथमखण्डे ऊनषष्ट्यधिकपञ्चाशदध्यायेषु (एकोनषष्टितमे अध्याये?) अस्य नाम कुमुदेन्दुमुनिना स्मृतम् अस्ति इति शंसति।

## आधारग्रन्थसूची

1. कुमुदेन्दु कवि विरचित कुमुदेन्दु रामायण, प्रधान सम्पादक: हम्प नागराजय्य, सम्पादक: डा॥ पि.वि. नारायण, प्रकाशकगण: कन्नड साहित्य परिषद्, बेंगलुरु, १९८१।

2. मंगरसकवि विरचित नेमिजिनेश संगति, परिशोधकः – एर्तूरु शांतिराजशास्त्री, प्र पंडितरत्न एर्तूरुशांतिराजशास्त्रीट्रस्ट,बेंगलुरु।

3. मंगरसकवि प्रणीतं जयनृपकाव्यम्, परिष्कारः एस. ई. नरसिंहाचार्, म. आ रामानुजैयङ्गार्, प्रकाशकः कर्णाटक काव्यमञ्जरी, मैसूरु, १८९७।

4. मंगरसकवि विरचित सम्यक्त्व-कौमुदि, प्रकाशकः, दे. फ. चौगुले, कर्णाटक जैन काव्यमाला-पुष्प १, बेळगावि, १९२३

5. कुमुदेन्दुमुनिः, आचार्यश्री. *श्रीभूवलयसिद्धान्तस्य मङ्गलपाहुडम्* [मङ्गलपाहुडं नाम प्रथमः खण्डः]। सम्पादितः आदित्यसागरमहाराजः, श्रुतसंवेगी मुनिश्री। व्याख्याता तेजस्विनी देशपाण्डे, डॉ। नमोऽस्तु शासनसेवासमितिः, कर्णाटकविभागः, २०२५।

*****************************

**ISSN 2250-1711**

**Journal of Veda Samskrita Academy**

**A National Peer-Reviewed Research Journal**

**Volume : XXVI, July to December-2025**

# SCIENTIFIC IMPOERTANCE OF BILVA (Aegle marmelos) PLANT

**Dr Ishwara Prasad A**

*MA (San), MSC (Bot), PHD (San)*

Department of Sanskrit, Samhita and Siddhanta
SDM College of Ayurveda & Hospital
BM Road, Thanniruhalla.
Hassan – 573201, Karnataka.
Ph: 9900766285
Email : ishwaraprasad84@gmail.com

Bilva is an important plant found every where in India being worshipped in shiva temples. This plant is native of India and found in countries such as Thailand, Bangladesha, Pakistan and Srilanka. Bilva plant belongs to Rutaceae family with scientific name *Aegle marmelos* (Linn) and common english name bael or wood apple. In Sanskrit it is having the synonyms as lakṣmīphalaḥ, hṛdyagandhaḥ, gandhagarbhaḥ, mahāaphalaḥ, śailūṣaḥ, śrīgandhaphalḥ, mālūraḥ, goharītakī, vātasāraḥ, nīlamallī, satyadharmā, dharāruhaḥ, māhākapitthaḥ, dhavikaḥ, rucīkaḥ, sarvarūpavān, bilvaḥ, śalāṭuḥ, śāṇḍilyaḥ, karkaṭaḥ, granthilaḥ, mataḥ, sadāphalaḥ, kṛṣṇamukhaḥ, kaṇṭakī nīlamallikā[1]. | bāle tvasya phale bilvakarkaṭī bilvapeśikā ||

Bilva properties are mentioned in different Koshas such as Dhanvantari Nighaṇṭu, Nighaṇṭu Ādarśa, Kaiyadeva nighaṇṭu[2], etc. Bilva pacifies kapha and pitta doshas which helps to maintain digestive health. Bilva root tastes sweet, balances tridosha-vata, pitta and kapha. The medicinal properties[3] of Bilva are its ability to aid digestion, antimicrobial action, cardioprotective qualities, immune system enhancement, diabetes management, anti-inflammatory properties, compounds in bilva have hepatoprotective effects supporting liver health, antioxidant defense, skin care, respiratory health etc.

Bilva plant is found in the sub-Himalayan Forests, from the Jhelum eastward, central and south India.

---

1. लक्ष्मीफलो हृद्यगन्धो गन्धगर्भो महाफलः॥१५॥ शैलूषः श्रीगन्धफलो मालूरो गोहरीतकी। वातसारो नीलमल्ली सत्यधर्मा धरारुहः॥ माहाकपित्थो धविको रुचीकः सर्वरूपवान्। बिल्वः शलाटुः शाण्डिल्यः कर्कटो ग्रन्थिलो मतः॥१७॥ सदाफलः कृष्णमुखः कण्टकी नीलमल्लिका। बाले त्वस्य फले बिल्वकर्कटी बिल्वपेशिका॥ - कैयदेवनिघण्टुः ओषधिवर्गः 15-18

2. श्रीफलस्तुवरस्तिक्तो ग्राही रूक्षोऽग्निपित्तकृत्। वातश्लेष्महरस्तस्य पत्रं संग्राहि वातजित्॥ १९॥ जटा दोषवमीकृच्छ्रशूलघ्नी मधुरा लघुः। कफवातामशूलघ्नो ग्राहिणी बिल्वपेशिका॥ काण्डं कासामवातघ्नं हृद्यं रुच्यग्निवर्धनम्। बिल्वं कटु कषायोष्णं तिक्तं दीपनपाचनम्॥ स्निग्धं तीक्ष्णं लघु ग्राहि हृद्यं वातकफापहम्। पक्वं विदाहि विष्टम्भि मधुरानुरसं गुरु॥२२॥ कैयदेवनिघण्टुः ओषधिवर्गः 19-22

3. https://www.hinduscriptures.in/vedic-lifestyle/symbols/the-sacred-bilwa-tree

Bilva plant is a large or middle-sized tree, deciduous, glabrous, armed with axillary, straight, sharp spines linear long. The branches are spiny. The bark is half inch thick, outer substance soft, grey, exfoliating in irregular flakes. The wood is yellowish white, or greyish white, hard with a strong aromatic scent when fresh cut; no heartwood. Pores are small ringed, in small groups of two or three together, sometimes, but not always, more numerous in the Autumn wood. Medullary rays are wavy, fine, short, white, numerous uniform and equidistant. Annual rings are marked by distant lines, and often by a continuous belt of pores. The leaves are alternate, trifoliate. The leaflets are 3 generally, sometimes 5, ovate-lanceolate, crenate, lateral sessile terminal long petioled. Flowers are bisexual, 4-5 merous, greenish - white, in short lateral panicles, with a fine, sweet, honey scent. Pedicels and calyx are pubescent. Calyx is flat, teeth small. The petals are imbricate, stamens numerous, oblong, flat testa densly clothed with thick fibrous hairs in a thick orange - coloured sweet aromatic gelatinous pulp.

**Chemical Composition**:

Root contain auraptene, marmin, umbelliferone and lupal. Alcoholic extract of root gave psoralen, xanthotexin, dimethoxy coumarin, scopoletin, tembamide marmin, skimmianine, and a glycoside skimmin. The presence of decursinol, an alkaloid haplopine, skimmianine-fagonine, marmesin, marmin, xanthotaxin, umbelliferone and lupeol is also reported from root bark. Wood contains -D-glucopyranoside, furoquinoline alkaloid, vinyl acetate, xanthotoxol-8-0- -sitosterol. dictaminine, marmelin, Fruit and stem contains gum. Fruit rind contains tannin. Fruit contains xanthotoxol, coumarins, scoparone, scopoletin, umbelliferone, -sitosterol, marmelide and marmesin, skimmin, allaimperatorin, marmesolin and psoralen. Seeds contain fatty oil. Bark contains tannin. Leaves yield an essential oil, aegelenine and aegeline; also condensed tannins; phlobotannins, flavan-3-ols, lecoanthocyanins, anthocyanins, flavonoid glycosides, skimmianine, -sitosterol, rutin, marmesinin.

**Ethnotherapeutics :**

Intake of Bilva leaves (juice) mixed with Trikatu decreases jaundice[4]. Obesity[5] is alleviated by taking decoction of Brhat pancamula (Bilva, Agnimantha, Syonaka Kasmari. and Patala). The paste of Bilva and Haritaki in equal parts removes foul smell of body and also mature boils[6]. Juice of Bilva leaves[7] removes faul odour of the body. One gets rid off fever[8] with colic by taking milk cooked with tender fruits of Bilva.

---

4. satryūṣaṇaṁ bilvapatraṁ pibennā kāmalāpahaml dantyardhapalakalkaṁ vā dviguḍaṁ śītavāriṇā || Carakasaṁhitā Cikitsāsthānam 16-59.

5. bilvo'gnimanthaḥ śyonākaḥ kāśmarī pāṭalā tathā | kvātha eṣāṁ jayen medodoṣaṁ kṣaudreṇa saṁyutaḥ || Śāraṅgadhara Saṁhitā 2-2-117.

6. bilvaśivā samabhāgā lepād bhujamūlagandhamapaharatil pariṇatapiḍakāñcāpi pūtikarañjotthabījaṁ vā || Bhāvaprakāśa Cikitsāsthānam 39-71.

7. bilvapatraraso vāpi gātradaurgandhyanāśanaḥl Vṛndamādhava 36-18.

8. एरण्डमूलोत्कथितं ज्वरात् सपरिकर्तिकात्। पयो विमुच्यते पीत्वा तद्वद् बिल्वशलाटुभिः॥ चरकसंहिता चिकित्सास्थानम् 3-235.

Juice of Bilva leaves is stained and added with ghee, rocksalt and Pippali, then it is rubbed with a cowrie in a copper vessel, fumigated with cow-dung fire and dissolved in milk. Filling eyes with this removes inflammation and pain and is useful in conjunctivities, glaucoma, lachrymation and congestion[9].

Oil mixed with alkali of Bilva[10] should be given in condition of vata causing pain in sides, stiffness and cardiac distress. In oedema[11] caused by three dosas, constipation, piles and jaundice, juice of Bilva leaves mixed with Marica is useful. During grahaniroga[12] one should take steamed tender fruits of Bilva with honey followed by intake of buttermilk added with Citraka powder. Paste of the tender fruit of Bilva[13] mixed with Sunthi powder and jaggery alleviates severe grahaniroga if the patient is kept on the diet of buttermilk.

One who eats tender fruits of Bilva regularly becomes able to control bleeding piles. In case of piles[14], the patient should be well massaged and then dipped into the warm decoction of Bilva. Saturating drink of buttermilk should be given mixed with Bilva and Kapittha for piles[15]. Cooked decoction of Bilva[16] added with honey should be taken in three types of vomiting. Decoction of Bilva and Sunthi checks vomiting[17] and visucika.

Sweet preparation with tender Bilva fruit, Ela, sugar and Laja (parched paddy) acts as appetiser[18]. Parched paddy mixed with sugar and dissolved in decoction of Bilva root (bark)[19] should be given to the child to check vomiting and diarrhoea. Badara fruits steamed with Bilva fruits[20] and when cooled taken with

---

9. bilvapatrarasaḥ pūtaḥ sājyasindhukaṇānvitaḥ | śulve varāṭikāghṛṣṭo dhūpito gomayāgninā || payasāloḍitaścākṣṇoḥ pūraṇācchophaśūlanut | abhiṣyande'dhimanthe ca srāve rakte ca śasyate|| Vṛndamādhava 61. 45-46.

10. pārśvaśūlamupastambhaṁ hṛdgrāhaṁ ca samīraṇaḥ | yadi kuryāt tatastailaṁ bilvakṣārānvitaṁ pibet || Aṣṭāṅgahṛdaya Cikitsāsthānam 15-45.

11. bilvapatra rasaṁ pūtaṁ soṣaṇaṁ śvayathau trije| viṭ saṁge caiva durnāmni vidadhyāt kāmalāsu ca || Vṛndamādhava 39-9. VM. 39.9.

12. svinnāni bālabilvāni khādet kṣaudreṇa mānavaḥ| takreṇānalagarbheṇa sārdhaṁ tad grahaṇīṁ jayet|| Baṁgasena Grahaṇī – 169.

13. śrīphalaśalāṭukalko nāgaracūrṇena miśritaḥ saguḍaḥ | grahaṇīgadamatyugraṁ takrabhujā śīlito jayati| Vṛndamādhava 4-10.

14. bilvakvāthe'thavā takre dadhimaṇḍāmlakāñjike| gomūtre vā sukhoṣṇe taṁ svamyaktamavagāhayet|| Carakasaṁhitā Cikitsāsthānam 14 - 47.

15. yuktaṁ bilvakapitthābhyāṁ mahauṣadhabiḍena vā | āruṣkarairyavānyā vā pradadyāttakratarpaṇam|| Aṣṭāṅgahṛdaya Cikitsāsthānam 8-35.

16. śrīphalasya guḍūcyā vā kaṣāyo madhusaṁyutaḥ| jayet tridoṣajāṁ chardiṁ parpaṭaḥ pittajāṁ tathā || Śāraṅgadhara Saṁhitā 2-2-85..

17. bilvanāgaraniḥkvātho hanyācchardivisūcikām | bilvanāgarakaiṭaryakvāthastadadhiko guṇaiḥ || Bhāvaprakāśa Cikitsāsthānam 6-112.

18. dīpano bālabilvailāśarkarālājasaktubhiḥ| Aṣṭāṅgahṛdaya Uttarasthāna 1-10.

19. bilvamūlakaṣāyeṇa lājāścaiva saśarkarāḥ | āloḍya pāyayed bālaṁ chardyatīsāranāśanam|| Baṁgasena Bālaroga - 49.

20. svinnāni piṣṭavad vāpi samaṁ bilvaśalāṭubhiḥ| Suśrutasaṁhitā Uttaratantre 40-133.

jaggery and oil checks diarrhoea. Fruit-pulp of Bilva and Madhuka mixed with sugar and honey and taken with rice-water checks diarrhoea[21] caused by pitta and rakta. One gets rid of abdominal disorder[22] (diarrhoea) after taking Pippali tender fruits of Bilva. The dietary preparation (khada) made of tender Bilva fruits[23], equal quantity of Sesamum paste, supranatant layer of curd and added with sour and ghee checks dysentery. To check diarrhoea[24] with blood immediately, tender fruits of Bilva mixed with liquid jiggery, honey and oil should be taken. Tender fruits of Bilva, Jaggery, Oil, Pippali and Sunthi-all these together should be taken in condition of obstructed vata pain and tenesmus. Decoction of Bilva and Amra seed mixed with honey and sugar checks vomiting and diarrhoea. Parts used are fruit, root and leaves. Dose for intake is Powder-3-5gm, Leaf juice is 10-20ml and Decoction is 50-100ml.

**Pharmacology :**

Ripe fruit pulp is a refreshing drink, soothening in diarrhoea and dysentery. Psoralen in fruit inhibit seed germination. Alyranocoumarin in the seeds are anti-ulcer. Seed yields 32% oil, antibacterial. Essential oil is antimycotic. Flowers allay thirst, vomiting and dysentery. Leaf, fruit, root extract hypoglycemic-regenerates damaged pancreas, promote wound healing. Leaves are used in abscess, maggot wounds.

**Religious Importance :**

Offering Bilva leaves is a method to please Lord Shiva. The three leaflets of leaves are considered to represent Brahma Vishnu and Shiva. Bilva leaves are used in daily Pooja to worship Lord Shiva. BIlva leaves believed to bring peace and prosperity, purifying the environment.

The bilva leaves are held sacred to Lord Ganesha, Suryanarayana, Satyanarayana, Mahesha and to goddessess Gowri, Varamahalakshmi, Parvati. The flowers are offered to Lord Ganesha, Shiva, and to the goddessess Gowri, Varamahalakshmi. Leaves are offered to sage Vishwamitra. Plant is held sacred to Citra constellation. This is one of the most sacred trees of India. It is generally cultivated near temples and dedicated to Lord Shiva, whose worship cannot be completed without the leaves of this tree. It is incumbent upon all Hindus to cultivate and cherish this tree and it is sacrilage to cut it down. The tree is sacred to the Trimurti, being a representative of Shiva. It is also sacred to the Parvati. The planting of the trees by the waysides gives long life.

---

21. bilvamadhyaṁ samadhukaṁ śarkarākṣaudrasaṁyutam| taṇḍulāmbuyuto yogaḥ pittaraktotthitaṁ jayet|| Suśrutasaṁhitā Uttaratantre 40-127.

22. kaṇāṁ madhuyutāṁ pītvā takraṁ pītvā sacitrakam| jagdhvā vā bālabilvāni mucyate jaṭharāmayāt|| Carakasaṁhitā Cikitsāsthānam 19-113 .

23. kalkaḥ syād bālabilvānāṁ tilakalkaśca tilakalkaśca tatsamaḥ| dadhnaḥ saro'mlasnehāḍhyaḥ khaḍo hanyāt pravāhikām || Carakasaṁhitā Cikitsāsthānam 19-34.

24. drave sarakte sravati bālabilvaṁ saphanitam |sakṣaudratailam prāgeva lihyādāśu hitaṁ hi tat || Suśruta Saṁhitā Uttaratantre 40—119

The leaves are used in enchantments. A story about origin of bilva tree says that one day when Parvati was resting, some drops of sweat fesll from her forehead on the Mandara parvata, from which bilva tree grew. Different deities lives in Bilva tree as Girija lives on the roots, Dakshayani on its branches, Parvathi in leaves, Katyayani in the fruit, Gauri in its flowers and various shaktis reside in thorns. The Goddess of wealth Lakshmi lives in bilva tree.

**References:**

1.Caraka Saṁhitā of Agnivesha Elaborated by Caraka &Dridhabalā Edited by Vaidya JadvjiTrikamji Acharya Published by ChaukhambaSurbharatiPrakashan Varanasi, Year : 2021.

2. SushrutaSaṁhitā of Sushruta Edited by Vaidya JadvjiTrikamji Acharya & Narayan RamacharyaKavyatirtha, Published by Chaukhamba Sanskrit Sansthan Varanasi, Year : 2015

3. Ashtangahridaya of Vagbhata Edited by Pt. Hari Sadashiva Shastri ParadkaraBhishagacharya Published by Chaukhamba Sanskrit Sansthan Varanasi, Year 2016

4. Aṣṭāṅgasaṁgraha of Vṛddhavāgbhaṭa, Prologue in Sanskrit and English by Prof. Jyotir Mitra, Edited by Dr Shivaprasad Sharma, Published by Choukhambha Sanskrit Series Office Varanasi, Year : 2019

5. Kaiyadeva-Nighaṇṭu Edited and translated by Prof Priyavrat Sharma & Dr Guru Prasada Sharma, Published by Chaukhambha Orientalia Varanasi, Year : 1979.

6. Caraka Samhita with Vaidya Manorama Hindi Commentary by Shukla Vidyadhar, Chaukhambha Sanskrit Pratishthana Varanasi, Year : 2006

7. Śārańgadharasaṁhitā (Cikitsāgrantha) Āyurvedoddhārakavaidyapañcānana5. Vaidyaratna rājavaidyapaṇḍita Rāmaprasādavaidyopādhyāya kṛta hindīṭīkā sahita published by Khemarāja Śrīkṛṣṇadāsa Bambayī Prakāśana, Mumbai, Year : 2004

8. Classical uses of Medicinal Plants by Priya Vrat Sharma published by Chaukhambha Vishvabharati, Varanasi, Year : 2004

9. The wealth of India, Published by The Director, CSIR New Delhi, Year : 1950

10. Baṁgasena (Hindīṭīkāsahita), Ṭīkākāraḥ Kavivara Śrī Śāligrāmajīvaiśya Saṁśodhana Kartā Śrī Vaidya Śankaralālajī Jaina, Khemarāja Śrīkṛṣṇadāsa Bambayī Prakāśana, Mumbai, Year : 2003

11. Flora of Bangalore District by Dr. S.V. Ramaswamy Published byPrasaranga, University of Mysore, Mysore, Year :1973

12. Poisonous and Medicinal Plants By K Narayana, Published by Jayashree Publications, Lower Palace orchard, Bangalore-003

13. Medicinal Plants of India, Volume 1 Karnataka Published by S.N.Yoganarasimhan Publication : Interline Publishing Pvt. Ltd Bangalore, Year : 1996

14. Scientific Significance of Plants used in Vaidikla samskara Karmas, PhD thesis of Ishwara Prasad A, submitted to University of Mysore in 2005

15. Sacred plants of India by Brahma Prakash Pandey, Publication : Sree Publishing House, 1049, KotraChhajju Pandit Model Basti, New Delhi, Year : 1989

16. Flora of Bangalore District by Dr. S.V. Ramaswamy Published by Prasaranga, University of Mysore, Mysore, Year :1973

17. Bhavaprakasha of Bhavamishra by Bhishagratna Pandit Sri Brahma Shankara Mishra (Part 2), Published by Chaukhambha Sanskrit Sansthan Varanasi, Year : 2000

18. https://www.hinduscriptures.in/vedic-lifestyle/symbols/the-sacred-bilwa-tree

************

ISSN 2250-1711
Journal of Veda Samskrita Academy
A National Peer-Reviewed Research Journal
Volume : XXVI, July to December-2025

# परवर्ती व्याकरण ग्रंथों पर काशिका वृत्ति का प्रभाव

**अनिशकुमार दूबे**
शोधछात्र, जैन-बौद्धदर्शनविभाग
संस्कृतविद्याधर्मविज्ञानसंकाय
काशीहिन्दूविश्वविद्यालय,वाराणसी- 221005
Email- anishdubeybhu@gmail.com,
मो.- +917991568156

**सारांश-**

संस्कृतव्याकरणके इतिहास में काशिकावृत्ति का स्थान अत्यंत महत्व पूर्ण है। यह ग्रंथ पाणिनीय अष्टाध्यायी पर आधारित एक सरल, सुव्यवस्थित, एवं शिक्षोपयोगी है। यह पाणिनीय अष्टाध्यायी के कठिनता को सुगम बनाने में सफल रही हैं। व्याकरणाचार्यों के लिए यह आदर्शव्याख्यात्मकग्रन्थ सिद्ध हुआ।

काशिकावृत्ति वह सेतु है जिसने पाणिनि के सूत्र शास्त्र को सिद्धांत कौमुदी की अतिसरल परम्परा तक पहुंचाया। संस्कृत व्याकरण परम्परामें पाणिनि अष्टाध्यायी निःसंदेह सर्वाधिक प्रामाणिक ग्रन्थ मानी जाती है। परन्तु अष्टाध्यायी की संक्षिप्त सूत्र शैली एवं गूढ़ दार्शनिक विवेचना सामान्य आचार्यों एवं विद्यार्थियों के लिए सह जरूपसे ग्राह्य नहीं थी, इसलिए काशिकावृत्ति और भी महत्त्वपूर्ण हो जाती है।

**मुख्यशब्द-**

काशिका, महाभाष्य, सिद्धान्तकौमुदी, पदमंजरी, अष्टाध्यायी, जैनेन्द्रव्याकरण, प्रत्यय, व्याकरणाचार्यों, गणपाठ।

**विषयविवेचन-**

यद्यपि महर्षि पतंजलि द्वारा रचित महाभाष्य अष्टाध्यायी की गहनतम व्याख्या के रूप में प्रतिष्ठित हुआ फिर भी उसकी दार्शनिक एवं तर्क प्रधान शैली व्यवहारिक अध्ययन के लिए कठिन मानी गई। इसी कठिनता को दूर करने के लिए सातवीं शताब्दी में आचार्य जयादित्य एवं वामन ने काशिकावृत्ति की रचना की। पाणिनि अष्टाध्यायी की कठिनता को सरलता सुचारू एवं सहज रूप से ग्राह्य बनाना ग्रंथ का मुख्य उद्देश्य रहा है। इस ग्रन्थ में कई गणपाठ उपलब्ध है जोकि बाकि ग्रंथों में अनुपलब्ध है यह भी इस ग्रंथ की विशेषता है, काशिका शब्द के दो अर्थ हो सकते हैं –प्रथम है कि काश धातु से निष्पन्नता के कारण इस का अर्थ प्रकाशित करनेवाली "यह प्रथम अर्थ है, और द्वितीय अर्थ पदमंजरी कार हरदत्त मिश्र के अनुसार काशिका की रचना काशी में हुई इसीलिए इस को काशिका कहा गया। **काशिषुभवाकाशिका**[1]।

"अष्टाध्यायी" पर अनेक प्राचीन एवं अर्वाचीन आचार्यों ने वृत्ति ग्रन्थ लिखे है। मूलतः दो प्रकार के

---

1. काशिकावृत्ति

व्याख्यान ग्रंथ उपलब्ध होते हैं प्रकरण अनुसार ग्रंथ – काशिका आदि । प्रक्रियानुसार ग्रन्थ "वैयाकरणसिद्धान्तकौमुदी" आदि । प्रकरणानुसार ग्रंथों में अष्टाध्यायी के सूत्रों को भंग किये बिना ही व्याख्यान किया जाता है । महर्षिपतञ्जलि ने व्याख्यान ग्रंथ का स्वरूप इस प्रकार बतलाया है- केवल चर्चा-परिचर्चा मात्र को व्याख्यान नहीं कहा जा सकता, अपि तु जहाँ उदाहरण, प्रति उदाहरण तथा अधिकार आदि की चर्चा होती है उसे व्याख्यान ग्रन्थ कहा जाता है । भाषावृति के अनुसार व्याख्यान के पाँच अवयव बतलाये गए -

1. पदच्छेद
2. पदार्थोक्ति
3. विग्रह
4. वाक्ययोजना
5. समाधान।

इन पांचों अवयवों से युक्त काशिकावृत्ति अष्टाध्यायी पर प्रमाणभूत ग्रन्थ है ।

"वाक्यपदीय" एवं महाभाष्य के उपरान्त काशिका ही सर्वाधिक प्रमाणिक एवं प्रचलित है । इसे एक वृत्ति तथा प्राचीनवृति के नाम से भी जाना जाता है ।

वैसे तो काशिका के कर्ता जयादित्य एवं वामन दोनों को बराबर कर्ता माना जाता है परन्तु इनमें भी कई मतान्तर है इसपर पण्डित बालशास्त्री, हरिदीक्षित, श्रीशचन्द्र, पं. युधिष्ठिरमीमांसक एवं चीनीयात्री इत्सिंग ने अपना-अपना मत दिया है ।

**काशिका की आवश्यकता**

अष्टाध्यायी क्रम के बिना सूत्रार्थ न तो स्पष्ट होता है और नाही बुद्धि में अवस्थित । काशिकावृत्ति के बिना पाणिनीय व्याकरण का तलस्पर्शी ज्ञान सम्भव नहीं है । अष्टाध्यायी के क्रम का अनुसरण कर के काशिकावृति के द्वारा व्याकरण का अध्ययन ही अध्येता – वर्ग के लिए लाभप्रद सिद्ध होता है, इसे सभी विद्वज्जन एक मत होकर स्वीकार करते हैं, कौमुदी क्रम से अध्ययन करने वालों को भीपद-पदपर अष्टाध्यायी – परायण की आवश्यकता पड़ती है । तत्परिणाम स्वरूप वर्तमान में विद्वज्जन को काशिकावृति के अध्ययन-अध्यापन की महती आवश्यकता अनुभूत है ।

**काशिका की वैशिष्ट्य एवं शैली**

इस में अष्टाध्यायी के प्रत्येक सूत्रों की व्याख्या की गयी है । इस की भाषा सरल व प्रवाहयुक्त है । इस की प्रसादमयीशैली ने इस ग्रन्थ को इतना लोकप्रिय बना दिया है कि इस की समता कोई दूसरा ग्रन्थ नहीं करसकता । इस में विशेषस्थलों पर कारिकाओं का उपयोग किया गया है तथा शंका-समाधान अन्त में निर्दिष्ट है । इस की विशिष्टता निम्नलिखित है-

- व्याकरण जैसे दुरुह तथा शुष्क विषय को सुगम तथा अत्यन्त रोचक शैली में प्रस्तुत किया गया ।
- वार्तिकों का अर्थसहित प्रस्तुति करण किया गया ।
- गूढ़स्थलों पर विस्तृत व्याख्या की गई ।

- काशिकावृत्ति में गणपाठ प्राप्त होता है।
- काशिकावृत्ति में सूत्रों की व्याख्या प्राचीनवृत्तियों से दी गई है।
- काशिकावृत्ति में महत्वपूर्ण वार्तिकों को भाष्य से ग्रहण किया गया है।
- कतिपय स्थलों पर भाष्य एवं काशिका का विरोध भी प्राप्त होता है।

इस की विशेषता में किञ्चित्पंक्तियाँ हैं, जोकि यह स्पष्टकरता है कि यह व्याकरणग्रन्थों पर आधारित है-

**वृत्तौ भाष्ये तथा धातूनामपारायणादिषु।**
**विप्रकीर्णस्यतन्त्रस्य क्रियते सारसंग्रहः ।।**[2]

अर्थात् –वृत्तिग्रन्थों में, भाष्य में, धातुपरायण तथा तन्त्र अर्थात्व्याकरणशास्त्र को प्रस्तुत किया जा रहा है।
इस के उपरान्त काशिकावृत्ति का प्रयोजन उद्धृत है-

**इष्ट्युपसंख्यानवती शुद्धगणाविवृतगूढसूत्रार्था।**
**व्युत्पन्नरूपसिद्धिर्वृत्तिरियं काशिका नाम ।।**[3]

अर्थात्- यह ग्रन्थ इष्टियों के व्याख्यान से युक्त, विशुद्धगणपाठों से युक्त तथा व्युत्पन्नरूपों की सिद्धि प्रस्तुत करनेवाली है।
इसी क्रम में एकश्लोक उपस्थित होता है-

**व्याकरणस्यशरीरं परिनिष्ठितशास्त्रकार्यमेतावात्।**
**शिष्टपरिकरबन्धः क्रियतेऽस्य ग्रन्थकारेण ।।**[4]

पूर्व के दो श्लोकों में काशिका को व्याकरणशास्त्र का शरीर बतलाया गया है। महाभाष्यकार पतञ्जलि आदि ने इसीका प्रणयन किया है।**"अथ शब्दानुशासनम्"**[5] शब्दानुशासननामक शास्त्र का प्रारम्भ किया जारहा है।
महर्षि पतञ्जलि के महाभाष्य की एक सुप्रसिद्धपंक्ति की काशिका में व्याख्या की गयी है-

**"लक्ष्यलक्षणे व्याकरणम्"** [6]**।**

**टीकाग्रन्थ**- काशिकावृत्ति पर पदमञ्जरी एवं न्यास नामक 2 दो प्रमुखटीकायें उपलब्ध होती है।
**पदमञ्जरी-** हरदत्त मिश्र एवं **न्यास** आचार्य देवनन्दिद्वारा रचित है।
**प्रभाव**- काशिकावृत्ति का प्रभाव केवल मात्र एक ग्रन्थ तक सीमित नहीं रहा, अपि तु इसने लगभग सभी समस्त परवर्ती व्याकरणग्रन्थों की नींवरखी। इन प्रभावों को तीन प्रकार के स्तरों पर रख सकते हैं।
(१) भाष्यात्मकस्तर
(२) वृत्तिकारस्तर
(३) नवव्याकरणस्तर

---

2. काशिकावृत्ति – श्लोक-1 3. काशिकावृत्तिश्लोक-2 4. शिकावृत्तिश्लोक-3 5. म.भा. 1.1 6. म.भा.

**(१) भाष्यात्मकस्तरपरप्रभाव -**

काशिकावृति के उपरान्त जो भी ग्रन्थ रची गयी है वह यातो काशिकाको आधारमानकर यातो उस की पद्धति का अनुकरण किया गया है।

(क) **न्यास** (जिनेन्द्रबुद्धि)—

यह ग्रन्थ काशिकावृत्ति पर आधारित है, इस में विस्तृत भाव्य का उल्लेख है। आचार्य जिनेन्द्रबुद्धि ने अत्यन्त गहराई से समीक्षा की है। आचार्य ने काशिका का दार्शनिक विवेचन भी किया है।

(ख) **पदमञ्जरी** - हरदत्तमिश्र-

यह ग्रन्थ भी काशिका पर आधारित है, पदमञ्जरी में काशिका के वार्तिकों एवं उदाहरणों की गू□व्याख्या की गयी है, इस ग्रन्थ पर भी काशिका का प्रभाव स्पष्टरूप से दिखालाई देती है।

(२) **वृत्तिकारस्तरपरप्रभाव**-

काशिकावृत्ति के उपरान्त जो भी वृत्तियाँ अथवा सर लटीकाएँ लिखी गई है वह सभी काशिकाके शैली से प्रभावित है।

(क) **प्रदीप**टीका ( कैय्यट)

यद्यपि प्रदीपटीका महाभाष्य पर लिखा गया है, लेकिन इस के सूत्र-व्याख्यानों में काशिका की संरचना का स्पष्ट अनुकरण दिखलाई पड़ता है। कैय्यट ने अपने ग्रन्थ में विभिन्नस्थलों पर काशिका के तर्क एवं उदाहरण को ग्रहण किया है। यह कहना गलत नहीं होगा कि यह ग्रन्थ भी काशिका से प्रभावित है।'

(ख) **तत्वबोधिनी** - ज्ञानेन्द्रसरस्वती -

यह ग्रन्थ भी काशिका से प्रभावित है, इस की शैली काशिका की परम्परा में आ जाती है। है, जहाँ पर सूत्रों के सरल अर्थ प्रयोग एवं उदाहरण मुख्य रहते हैं।

(३) **नवव्याकरणस्तरपर प्रभाव**-

काशिका-वृत्ति का प्रभाव केवल पारम्परिक पाणिनीय शाखा तक सीमित नहीं रहा, अपि तु बाद के स्वतन्त्र व्याकरणप्रणेताओं पर भी इस का अत्यन्तगहरा प्रभाव पड़ा।

(क). **वैयाकरणसिद्धान्तकौमुदी** ( भट्टोजीदीक्षित)-

इस ग्रन्थ की रचना का मुख्य उद्देश्य वही था जो काशिकावृत्ति का था, पाणिनीय अष्टाध्यायी को सरल एवं सुगम रूप में प्रस्तुत करना। भट्टोजिदीक्षित के सूत्रों का पुनःक्रमण कर के व्याकरण को शिक्षोपयोगी बनाया, ठीक उसी प्रकार जिस प्रकार जयादित्यवामन ने बनाया था। सिद्धान्तकौमुदी की भाषा तथा व्याख्यापूर्णरूप से काशिका से प्रभावित है।

(ख)- **लघुसिकान्तकौमुदी एवं मध्यसिद्धान्तकौमुदी- (वरदराजाचार्य)** –

इन ग्रन्थों ने भी काशिका के उद्देश्य को पकड़कर रखा तथा उस का अनुसरण भी किया, काशिका के समान ही सरलीकरण की ओर इस ग्रन्थ ने अपनी नींवरखी। इस में उदाहरण एवं प्रत्ययों की व्याख्या उसी पद्धति में की गई है जैसी काशिका में उपलब्ध होती है।

(ग) **परिभाषेन्दुशेखर** (नागेशभट्ट) नागेशभट्ट जीने भी काशिका के अनेक तात्विक निष्कर्षों को अपने परिभाषाओं में संग्रहीत ग्रन्थ में ग्रहण किया है। नागेशभट्ट ने कई स्थलों पर "काशिकायां उक्तम्"[7] ऐसा कहकर काशिका के मत का उल्लेख किया है।

**अन्यशाखाओं में काशिकावृत्ति का प्रभाव-**

**जैनेन्द्रव्याकरण**-

यद्यपि यह एक स्वतन्त्र जैनपरम्परा का व्याकरण ग्रन्थ है, किन्तु इस की सूत्रशैली, उदाहरण, प्रयोग आदि में काशिका की शैली स्पष्टरूप से दिखलाई पड़ती है।

इसी प्रकार चान्द्रव्याकरण भी पाणिनीय व्याकरण से भिन्न होते हुए भी किञ्चित्स्थलों पर कशिका की शै लीकी प्रतीति होती है। सरस्वतीकण्ठाभरण एक काव्यात्मकव्याकरण का ग्रन्थ है, किन्तु इस के तर्क एवं सूत्रार्थ काशिका से प्रभावित है।

**निष्कर्ष -**

एतावता इन विभिन्नग्रन्थों के साक्ष्य दृष्टव्य होने से यह स्पष्ट है कि काशिकावृत्ति का परवर्ती व्याकरण ग्रन्थों पर गहरा एवं अद्भुत प्रभाव पड़ा है। काशिका ने पाणिनीय परम्परा को अतिसरल, जनसुलभ, सुव्यवस्थित एवं शिक्षोपयोगी बनाया। काशिका के प्रभाव से परवर्ती व्याकरण ग्रन्थों की नवीनपरम्परा प्रारम्भ हुई जिस में – वैयाकरणसिद्धान्तकौमुदी, पदमञ्जरी, न्यास, परिभाषेन्दुशेखर आदि प्रमुख हैं जोकि काशिका से प्रभावित है। वै से काशिका का प्रभाव केवल मात्र व्याकरण परम्परामें नही रही है, अपि तु दर्शन, शिक्षापद्धति एवं व्यवहार पर भी यथासम्भव गहरा प्रभाव पड़ा है॥

**सन्दर्भसूची-**

(१) काशिकावृत्ति, जयादित्यवामन, चौखम्भासुरभारतीप्रकाशनवाराणसी

(२) महाभाष्य, महर्षिपतञ्जलि, चौखम्भासुरभारतीप्रकाशनवाराणसी

(३) अष्टाध्यायी , पाणिनि,चौखम्भासुरभारतीप्रकाशनवाराणसी

(४) पाणिनि.असर्वेऑफरिसर्च,जार्जकार्डोना,मोतीलालबनारसीदासप्रकाशनदिल्ली

(५) संस्कृतव्याकरणशास्त्रकाइतिहास,युधिष्ठिरमीमांसक, भारतीयप्राच्यविद्याप्रतिष्ठान

(६) जैनेन्द्रव्याकरण, आचार्यदेवनन्दि, भारतीयज्ञानपीठकाशी

**************************

---

7. परिभाषेन्दुशेखर

ISSN 2250-1711
Journal of Veda Samskrita Academy
A National Peer-Reviewed Research Journal
Volume : XXVI, July to December-2025

# भारतीयज्ञानपरम्परायां किमर्थम् आसीत् शब्दस्य अत्यधिकं महिमा

## (Why was the word so highly regarded in the IndianKnowledge System?)

**Dr. Sumanta Bhaskar**
Assistant Professor,
School of Vedic Knowledge System,
Chinmaya Vishwa Vidyapeeth,
Onakkoor Road, Ernakulam, Kerala – 686667.
Ph-8116532861
Gmail- vedavidbhaskar@gmail.com

* **शब्दस्वरूपम्**

भारतीयज्ञानपरम्परायां शब्दस्य अत्यधिकं महत्त्वं तत्त्वतः दर्शनप्रणालीनां मूलस्वरूपे एव निहितम् अस्ति। शब्दः केवलं भाषायाः माध्यमं न, अपि तु ज्ञानप्राप्तेः, ब्रह्मविज्ञानस्य च मुख्योपायः इति भारतीयाः आचिन्तयन्। इदं कारणं यत्, शब्दः न केवलं अर्थबोधनाय प्रयुज्यते, अपि तु सः स्वयमेव तत्त्वबोधनाय समर्थः इति मन्यते।

नीचे अस्य प्रश्नस्य विस्तृतं उत्तरं दर्श्यते—

*** शब्दः ज्ञानहेतुः**

भारतीयदर्शनपरम्परायां विशेषतः न्यायदर्शने, शब्दः प्रमाणत्वेन स्वीक्रियते।

**प्रमाणम्** इत्युक्ते यद् अर्थसिद्धिकरणे समर्थं तद्।

**शब्दः प्रमाणम्**इत्युक्ते वेदवाक्यानि, आप्तवाक्यानि च ज्ञानाय साधनानि भवन्ति। तस्मात्, शब्देन साधुज्ञानात् सत्यम् अपि प्राप्तुं शक्यते।

*** वेदेषु शब्दमहिमा**

वेदाः अपौरुषेया: इति श्रूयते। ते शब्दस्वरूपा एव। वेदवाणी (श्रुति) ब्रह्मस्वरूपिणी इत्यपि मन्यते। तेन वेदवाक्यस्य (शब्दस्य) अविचलितं सत्यत्वं स्वीक्रियते।

*** मीमांसायां शब्दे परमार्थतत्त्वविवेचनम्**

मीमांसकाः शब्दं नित्यं मन्यन्ते।

"शब्दः नित्यः, अर्थः अपि तेन ज्ञायते" इति तेषां प्रतिपत्तिः। शब्दस्य नित्यत्वात् तेन ज्ञेयस्य (धर्मस्य) अपि नित्यत्वं सिध्यति।

*** योगदर्शने शब्दः साधनस्वरूपः**

पतञ्जलियोगसूत्रेषु "तज्जपस्तदर्थभावनम्" इत्युक्तं — मन्त्रजपेन (शब्देन) ईश्वरप्राप्तिः साध्या।

अत्र ओंकारः परमशब्दरूपेण चिन्त्यते।

*** व्याकरणे शब्दस्य तात्त्विकत्वम्**

पाणिनीयव्याकरणं शब्दानुशासनम् इत्येव।

भाषायाः शुद्धता, अर्थबोधशक्तिः, प्रमाणत्वं च — एते सर्वे गुणाः शब्दनिष्ठत्वात् सम्भवन्ति।

भाषायाः विकासः अपि तत्रैवाद्भूतः।

*** तन्त्रशास्त्रेषु मन्त्रमाहात्म्येन शब्दमहत्त्वम्**

मन्त्राः अपि विशेषशब्दरचनाः। मन्त्रजपेन मानसिकविकासः, आत्मसिद्धिः, शक्तिसञ्चारः च संभवति — एतदपि शब्दस्य महिमा। इत्यादयः सर्वे अग्रे आलोच्यन्ते।"वागेव विश्वा भुवनानि जज्ञे" इति श्रुतिकथितान्यनेकानि प्रमाणानि वर्तन्ते यैः शब्दस्य मुख्यप्रयोजनं प्रतिपाद्यते। अयं शब्दः सर्वविधलोकव्यवहारं समुत्पादयति। अयं शब्दः व्यापकः नित्यश्च भवति। परन्तु अत्र शब्दस्य नित्याऽनित्यत्वविषये विभिन्नमतानि वर्तन्ते, तान्यहं वक्ष्ये। शब्दस्योत्पत्तिविषयेऽपि अनेके वादाः प्रसिद्धाः सन्ति। केचन "अनुरणन" सिद्धान्तमत्र (शब्दोत्पत्तिविषये) स्वीकुर्वन्ति, केचिच्च पृथगेव भणन्तीति। अत्र विषये नैकानि मतानि वर्तन्ते।

*** न्यायमते शब्दस्वरूपविमर्शः**

प्रत्यक्षानुमानोपमानशब्दाः इति चत्वारि प्रमाणानि वर्तन्ते। तत्रान्तिमं प्रमाणं शब्दप्रमाणम् एव भवति। अत्र शाब्दप्रमायाः करणं शब्दप्रमाणं भवतीति। सिद्धान्तमुक्तावल्याम् एवमुक्तम्

**पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः। शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी।।** [1]

अत्र "पद" इति (श्लोकेऽस्मिन्) उच्चरितं पदं शब्दस्य बोधकं वर्तते। स च शब्दः कीदृशः इत्यत्र नैयायिकानां मतं निरूप्यते-

नैयायिकाः वदन्ति शब्दोऽनित्यः सकारणकत्वात् घटवत्, यत् यत् सकारणं तत्तदनित्यं यथा घटः वर्तते। सकारणकश्च, शब्दोऽप्यनित्यो वर्तते। यथा मृत्तिकादिजन्यः घटो वर्तते तथैव संयोगश्च शब्दं जनयति विभागोऽपि शब्दं जनयति। वंशदलद्वयविभागेन चटचटाशब्दस्योत्पत्तिः भवति इति सर्वे जानन्ति, भेरीदण्डसंयोगेन झङ्ङ्काराादिशब्दोत्पत्तिः इत्यपि सर्वेऽनुभवन्ति, तथैव देवदत्तोच्चारितशब्दो वीचीतरङ्गन्यायेन शब्दान्तरं जनयति। जायमानशब्दोऽपि शब्दान्तरमिति रीत्या जायमानं कर्णविवरवर्तिनं शब्दं यज्ञदत्तः शृणोति। इन्द्रियाणि प्राप्यकारीणि भवन्ति, नत्वप्राप्यकारीणि। तथा सतीन्द्रियसंबद्धा अपि शब्दाः श्रवणगोचरीभूताः भवेयुः।

ननु संयोगविभागौ शब्दस्य उत्पत्तौ कारणे भवतः ? आहोस्वित् अभिव्यक्तिकारणमिति संशयोऽत्र जागर्ति। सति संशये नैकतर-कोटिनिश्चयो भविष्यतीति चेत्सत्यं शब्दोऽनित्यः इन्द्रियग्राह्यत्वाद् रूपादिवत् इत्यनुमानेन शब्दस्याऽनित्यत्वं ज्ञायताम्। दारुव्रश्चने दारु (काष्ठम्) परशुसंयोगनिवृत्तौ सत्यां दूरस्थेन शब्दो गृह्यते। न च व्यञ्जकाऽभावे व्यङ्ग्यस्य ग्रहणं दृश्यते। दीपे सति घटं पश्यति जनः, न तु तदभावे अन्धकारे। तथा च शब्दस्य संयोगो न व्यञ्जकः, किन्तु जनक एवेत्यवधारयते भवान्। संयोगस्य शब्दोत्पादकत्वे तु संयोगजन्यशब्दः सजातीये शब्दान्तरमुत्पादयति सोऽपि तथेति वीचीतरङ्गन्यायेन जायमानं शब्दं श्रोत्रं गृह्णाति।

ननु येनेन्द्रियेण यद् गृह्यते तेनैव तद्गता जातिः तदभावश्च गृह्यत इति नियमेन घटत्वस्य चक्षुर्ग्राह्यत्वेऽपि तस्य नित्यत्वेन कथं शब्दस्याऽनित्यत्वं निश्चिनोति।

यथा तीव्र भवानिति चेत् जन्यवदुपचारेण शब्दस्य अनित्यत्वं निश्चिनोमि। अयं भावः सुखम्, मन्दं सुखम्, तीव्र दुःखम्, मन्दं दुःखं यथोपचर्यते, तथैव तीव्रशब्दो मन्दशब्द इत्यपि भवति। सुखदुःखयोः प्रागभावप्रतियोगिनोरनित्यत्वं सर्ववादिसंमतमिति शब्दस्य तत्सादृश्यात् अनित्यत्वमत्रापि अवधारयामि "आदिमत्वात् ऐन्द्रियकत्वात् कृतकत्वात् उपचाराच्च" इति गौतमसूत्रमपि चात्र प्रमाणम् इति। अतः नैयायिकाः शब्दस्याऽनित्यत्वं सप्रमाणम् उपस्थापयन्ति।

*** मीमांसकमते शब्दस्वरूपम्**

मीमांसकाः शब्देऽनित्यत्वं विभुत्वञ्च स्वीकुर्वन्ति। यतोहि ते शब्दानित्यत्ववादिनः। ते घटादिपदेन केवलं जातिबोधनं स्वीकुर्वन्ति, यतोहि

---

1. न्यायसिद्धान्तमुक्तावली, शब्दखण्ड. 7 वैयाकरणसिद्धान्तपरमलघुमञ्जूषा पृ. सं. 113

पदार्थबोधं प्रति पदजन्यपदार्थोपस्थितिः कारणं भवति, अतः यद्येकत्र घटपदेन कम्बुग्रीवादिमदर्थस्य बोधनं मातृपित्रादिना कृतम्, तदा अन्यत्र घटं पदं दृष्ट्वा कम्बुग्रीवादिमदर्थस्य बोधनं (मातापित्रादिना) विनैव कथं बोधः, अतः अत्र व्यतिरेकव्यभिचारो भवति (व्यतिरेकव्यभिचारो नाम तदसत्वे तद् भावः) यतोहि अत्र (देशान्तरे) बोधकाभावेऽपि पदार्थबोधं पदजन्य पदार्थोपस्थित्यभावे भवत्येव। एकस्मिन् गृहे एकः उत्तमवृद्धो भवति सः पदार्थनाम्ना पदार्थं पदार्थत्वेन स्वीकरोति, मध्यमवृद्धः पदार्थनाम श्रुत्वा पदार्थम् आनयति एतत् सर्वमपि व्यवहारं समीपस्थितः जिज्ञासुः बालकः पश्यति तदनन्तरं स्वयमपि तं पदार्थं ज्ञात्वा अनन्तरं नयनमानयनं वा करोति। स एव बालकः यदि देशान्तरे गच्छति तदा तत्र गत्वा सः पूर्वज्ञातपदार्थं पदजन्यपदार्थोपस्थितिं विनैव जानाति। यतः पदजन्यपदार्थोपस्थितिरूपकारणं विनैव पदार्थबोध रूपकार्य भवति, अतः कारणाभावेऽपि कार्यात्पत्तिसत्वात् भवति व्यतिरेकव्यभिचार इति। अत एव जातौ शक्तिः न तु व्यक्तौ इति। घटत्वादिजातेः सर्वत्रानुस्यूतत्वात्। परन्तु लोके घटमानय, घटं नय इति व्यवहारे व्यक्तेरेव आनयनं नयनं वा भवति, अतः लोकव्यवहारस्य सत्त्वात् कथं व्यक्तिबोधः, यतः न हि लोकात् भिद्यते शास्त्रमिति अत्राशङ्कायां लक्षणयाऽऽक्षेपात् वा इति समाधानद्वयं प्रदत्तम्। अयमर्थ व्यक्तेः बोधः लक्षणया भविष्यति। यतोहि अन्वयानुपपत्तिः, तात्पर्यानुपपत्तिर्वा लक्षणायां बीजं भवति। अतः वक्तृतात्पर्यानुपपत्तौ गौरित्यादिपदेन गोत्वविशिष्टगोपदार्थस्य बोधो भविष्यति। अथवा आक्षेपात् भविष्यति। यथा पीनोऽयं देवदत्तः "दिवा न भुङ्क्ते" अत्र भोजनं विना पीनत्वस्य अनुत्पादनात् रात्रिभोजनाक्षेपः, तथैव व्यक्तिं विना जातेरसत्वात् व्यक्तिबोधः इति।

वर्णाऽनित्यत्वविभुत्ववादिनां मीमांसकानां मते वर्णानां विभुत्वनित्यत्वानन्त- वर्णतत्प्रागभाव तद्ध्वंसकल्पनं न भवति न वा स्वराणां त्रयस्त्रिंशद्व्यञ्जनानां विसर्गादीनाञ्च नित्यानां स्वीकरणे तद्व्यञ्जकानां ध्वनीनां क्रमेणाऽभिव्यक्तिमतां प्रत्येकवर्णेन अर्थाबोधात् सकलवर्णोच्चारणानन्तरं बोधदर्शनात् संहत्यकारित्वोपपत्तये तत्प्रयोजकभावनाख्यसंस्कारस्मृतिकल्पने च गौरवात्, सर्वानुभूतस्य पदस्य वाक्यस्य च मिथ्यात्वकल्पनमनुचितमिति दोषग्रस्तत्वाच्च तन्मतं (मीमांसकमतं) चिन्त्यम्।

*** वैयाकरणमते शब्दस्वरूपम्**

वैयाकरणाः शब्दनित्यत्ववादिनः सन्ति। अत्र पतञ्जलिराह "शब्दप्रमाणकाः आह वयम्, यच्छब्दः तदेव अस्माकं प्रमाणमिति" आह। अर्थात् वैयाकरणाः शब्दप्रमाणं प्रमुखरूपेण परिष्कुर्वन्ति स्वीकुर्वन्ति च। इतः पूर्वं शब्दस्याऽनित्यत्वविषये नित्यत्वविषये च नैयायिकमीमांसकयोः मतं ज्ञातम्। अत्र शब्दनित्यत्वविषये वैयाकरणमतम् अवगमिष्यति। व्याकरणविषये सर्वमान्याचार्याः त्रयः सन्ति पाणिनिकात्यायनपतञ्जलयः। तत्र शब्दानित्यत्वनित्यत्वविषये आचार्यपतञ्जलिमतं सर्वविदितं व्यापकं सर्वमान्यञ्च वर्तते। महाभाष्यस्य आदौ भगवता पतञ्जलिना प्रोक्तम् "अथ शब्दानुशासनम्" इति। एतेन वाक्येन ज्ञायते व्याकरणस्यापरत्राम शब्दानुशासनमपि भवति। शब्दानुशासनमित्यत्र शब्दानाम् अनुशासनम् - शब्दानुशासनम्, षष्ठीतत्पुरुषसमासो वर्तते, शब्दानाम् इत्यत्र कर्मण्यर्थे षष्ठी वर्तते। अतः अर्थो भवति शब्दकर्मकमनुशासनमिति। अत एव पुनरग्रे भाष्यकारो भणति केषां शब्दानाम् इति। तस्योत्तरं स्वयमेव ददाति लौकिकानां वैदिकानाञ्च, (स्वयमेव प्रश्नः स्वयमेव उत्तरमिति भाष्यकारस्य विशिष्टशैली परम्परा च वर्तते। तत्र लौकिकाः शब्दाः गौः, अश्वः, पुरुषः, हस्ती, शकुनिः, मृगः, ब्राह्मणः इत्यादि। वैदिकाश्च शन्नो देवीरभिष्टये इत्यादि। लौकिकपदस्यार्थो भवति लोके भवनशीलः। यतोहि लोके भव इति विग्रहे "अध्यात्मादित्वाट्ठञ्" इति सूत्रेण ठञ् प्रत्ययो भवति। तथा "तद्धितेष्वचामादेः" इत्यनेन आदिवृद्धौ सत्यां प्रयोगोऽयं सिद्ध्यति। तथैव वैदिकशब्दार्थः सिद्धिप्रकारश्च भवति।

अग्रे पुनः भाष्यकारो वदति गौः इत्यत्र शब्दः पदार्थः कः वर्तते। गौः इति कथनेन एकोऽर्थः आयाति, स चार्थः कः अस्ति। यतोहि अर्थबोधनाय शब्दप्रयोगो भवति। इति प्रश्ने समागते सति गौः इत्यादि शब्दजन्यपदार्थं द्विविधं प्रतिपादयति। तथा हि-

"येनोच्चारितेन सास्नालाङ्गलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्द इति" अर्थात् यत्पदोच्चरिताव्यवहितोत्तरं (पदश्रवणानन्तरं) येनार्थः पुरोऽवतरति स शब्दः पदार्थ इति। यथा- गौरितिपदश्रवणानन्तरं झटिति सास्नालाङ्गलककुदखुरविषाणिनां ज्ञानं भवति। अथ गौः इत्यत्र सास्नालाङ्गलककुदखुरविषाणवत्पदार्थः उपस्थितो भवति। अतः स एव गोपदार्थ इति तथैवाग्रे घटादिपदार्थोऽपि बोध्यः। अयं शब्दः स्फोटात्मको वर्तते। स्फोटश्च स्फुटत्यर्थोऽस्मात्, स्फुट्यतेऽभिव्यज्यते असौ स्फोटः इत्यर्थसम्पादको वर्तते। अयं स्फोटः ध्वनिनाऽभिव्यज्यते। स च ध्वनिः द्विविधः प्राकृतः, वैकृतश्च। प्राकृतध्वनिनैव स्फोटोऽभिव्यज्यते। उक्तञ्चहरिणा-

**स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते। शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः॥** [2]

शब्दस्य स्फोटस्य, अभिव्यक्तेः प्राकृतध्वनिजन्याऽभिव्यक्तेः, ऊर्ध्वमनन्तरं वैकृतात् ध्वनयः जायन्ते। वृत्तिभेदे द्रुतादिवृत्तिभेदे तावत्कालं स्फोटोपलम्भ इत्यर्थः, समुपोहन्ते - कारणानि भवन्ति, तैः वैकृतध्वनिभिः, स्फोटात्मा स्फोटरूपं न भिद्यते। वृत्तिभेदेऽपि "स एवायमकारः" इति प्रत्ययादिति भावः। अयं भावः यथा प्रकाशः उत्पन्न एव पटादिभ्यो भिन्नं घटं प्रकाशयति अनन्तरं तु प्रकाशेन पुनः पुनः दृश्यमानेऽपि घटो न पूर्वप्रकाशितघटात् भेदमवलम्बते, तथा प्राकृतध्वनिरेव भिन्नं स्फोटमभिव्यञ्जयति, तदनन्तरं वैकृतध्वनिस्तु पूर्वाऽभिव्यक्तस्यैव तावत्कालम् उपलम्भे हेतुर्भवति न पूर्वाभिव्यक्ताद् भेदे, अत एव द्रुतादिवृत्तिभेदेऽपि अकार एव पुनः पुनरुपलभ्यते, तथा च अनुभवस्तमेवाऽयं विलम्बितमुच्चारितवान् अन्यो द्रुतमिति, हस्वदीर्घयोस्तु नैवमनुभव इति तत्र विषयभेदः इति वृत्तिभेदेऽपि वर्णस्य भेदो न गृह्यते इति सर्ववृत्तिषु तत्कालत्वम् इति।

भाष्यकारः प्रथमलक्षणं परित्यज्य नैयायिकाभिमतं ध्वनिरूपानित्यात्मक-शब्दलक्षणमपि प्रतिपादयति। तथा च "अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते, तद्यथा-शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्ययं माणवकः इति ध्वनिं कुर्वन्नेवम् उच्यते। तस्मात् ध्वनिः शब्दः। अयं भावः अत्र भाष्यकारः लौकिकव्यवहारं संगृह्य नैयायिकमतं पोषयति। नैयायिकाः अनित्यात्मकध्वनिमेव पदार्थत्वेन स्वीकुर्वन्ति। यथा लोके जनाः ध्वनिं कुर्वाणं बालकं प्रति शब्दं मा कुरु इति व्यवहारं कुर्वन्ति, स च व्यवहारोऽनित्यध्वन्यर्थमेव भवति। अतः द्वितीयलक्षणं शब्दः पदार्थः ध्वनिः इति मतं प्रतिपादयति।

शब्दनित्याऽनित्यविचारे सम्प्रति भाष्यकारः **"सिद्धे शब्दार्थसम्बन्धे"** [3] इति अत्र वार्तिके भाष्यकारः नित्यार्थकसिद्धपदस्यान्वये पदार्थविवेचनं कृतवान्, तद्यथा वैयाकरणः गौः इत्यादिपदैः जातिविशिष्टव्यक्ते बोधं स्वीकुर्वन्ति। परन्तु भाष्यकारेण अत्रोच्यते यत् केवलं द्रव्यबोधने अथ च केवलं जातिबोधने (आकृतिबोधने) च किं वैशिष्ट्यम् इति उच्यते इदानीं तन्मतमिति-

अत्र जिज्ञासा भवति यदि अर्थपदं द्रव्यस्य वोधकं तदा नित्यार्थवाचकसिद्धपदेन सह कथमन्वयः स्यात्। यतोहि अनित्यत्वेन द्रव्येण सह नित्यार्थकसिद्धपदं कथमन्वेति। अत एव अर्थपदोपस्थाप्यस्य द्रव्यस्यान्वयः सिद्धपदेन सह नोचितः स्यात्। अयमाशयः यत्र सम्बन्धो भवति, तत्र पदार्थद्वयमध्ये भवति, तत्र द्वयोः पदार्थयोः मध्ये एकः प्रतियोगी भवति, द्वितीयश्चानुयोगी भवति यस्य सम्बन्धः स प्रतियोगी यत्र सम्बन्धः स अनुयोगी यथा "घटवत् भूतलम्" इति वाक्ये घटस्य भूतलेन सह आधाराधेयभावसम्बन्धो भवति, अत्र घटः प्रतियोगी वर्तते, तथा च भूतलपदार्थः अनुयोगी वर्तते। तथैव अत्रापि शब्दस्यार्थेन सह सम्बन्धो भवति, स च सम्बन्धः तादात्म्यरूपः। अत्र शब्दप्रतियोगिकः अर्थानुयोगिकः यः तादात्म्यरूपसम्बन्धो वर्तते, तत्र अर्थस्य (द्रव्यस्य) अनित्यत्वात् कथमुभयोः सम्बन्धो नित्यः स्यात्। इति आशङ्कापहर्त्रा आचार्यपतञ्जलिनोक्तम् "नित्यो हि अर्थवताम् अर्थैः अभिसम्बन्धः।" अयमाशयः द्विविधोऽर्थः भवति एकः बौद्धिकार्थः अपरश्च लौकिकार्थः। एतस्य विषयस्यास्य चर्चा समग्रे एव करिष्यते। अत्र बौद्धार्थम् (नित्यार्थः) आदाय भवति सिद्धपदेन सहान्वय इति। अतः वैयाकरणानां मते नास्ति क्लेशप्रसङ्गः शब्दनित्यत्वस्वीकारे।

---

2. भर्तृहरिः, २०७२, पृ. १३२ 3. महाभाष्ये पस्पशाह्निकम्

*** शब्दस्य ध्वन्यात्मकं रूपम्**

वाक्यपदीयकारेण भर्तृहरिणा स्वपुस्तके आदौ स्फोटस्वरूपं वर्णितम्। अष्टौ स्फोटाः सन्ति, ते यथा

**क) वर्णस्फोट:**

**ख) पदस्फोट:**

**ग) वाक्यस्फोटः**

**घ) अखण्डपदस्फोटः**

**ङ) वर्णजातिस्फोटः**

**च) पदजातिस्फोटः**

**छ) वाक्यजातिस्फोटः**

**ज) अखण्डवाक्यस्फोटः** इति।

इतः परं स्फोटध्वनयोर्मध्ये सम्बन्धं स्थापयितुमुच्यते श्लोकः-

स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिनः। ग्रहणोपाधिभेदेन वृत्तिभेदं प्रचक्षते।। इति।

अर्थात स्फोटो यद्यपि नित्यः कालभेदातीतः वृत्तिभेदरहितश्च वर्तते तथापि स स्फोटः स्वव्यञ्जकध्वनेः मात्राकालभेदेन स्थितिभेदेन च मात्राकालिकत्वादिकालभेदवान् द्रुतादिवृत्तिभेदवान् वा भवति। यतो हि ध्वनिसंसृष्टस्य तदुपरहितस्यैव स्फोटस्योपलब्धिः सम्भवेत् न तु तद्रहितस्य शुद्धस्य। यावन्मात्राकालपरिमाणो भवति प्राकृतध्वनिः तावन्मात्राकालपरिमाण: स्फोटः उपलभ्यते। यावदेव वैकृतध्वनेः स्थितिर्भवति तावदेव स्फोटस्य स्थितिरुपलभ्यते। इत्येवं ध्वनेः अन्वयव्यतिरेकानुविधायितया व्यञ्जकध्वनिरूपोपाधेः धर्मभेदाः व्यङ्ग्ये स्फोटे समारोप्यन्ते, तत्कृत: स्फोटस्य कालभेदः वृत्तिभेदः व्यपदिश्यते।

ततः ध्वनेः प्रकारविषये हरिणोक्ता कारिका-

**शब्दस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते । स्थितिभेदनिमित्तत्वं वैकृतः प्रतिपद्यते ॥**[4] इति।

ध्वनिः द्विविधो भवति- प्राकृत: वैकृतश्च। प्रकृतौ भवः प्राकृतः। प्रकृतौ= स्फोटस्वरूपे भवः वर्तमानः इति प्राकृतः। स्फोटाभिव्यक्तिकाले ध्वनिस्फोटयोः नीरक्षीरन्यायेन पृथक्त्वेनोपलब्धिः न जायते। अतः स्वभावमिव गृह्यते। प्राकृतध्वनिं विना स्फोटोऽभिव्यक्तो नैव भवति सामान्यरूपेण विशेषरूपेण ना। एवञ्च येन ध्वनिना स्फोटः अभिव्यञ्जते स प्राकृतः। येन ध्वनिना च स्फोटः विकृत इव जायते स वैकृतः। विकृत एव वैकृतः। स वैकृतस्वनिरयं स्फोटस्य स्थितिभेदे वृत्तिभेदे वा निमित्तो भवति।

ततः उच्यते यत्- शब्दाभिव्यक्तेः अव्यवहितोत्तर काले यो हि स्फोटे शब्दे श्रुतादिवृत्तिभेदः प्रतीयते, सः वस्तुतः स्फोटस्य नास्ति, अपितु वैकृतध्वनेरेव विद्यते। स्फोटात्मा शब्दब्रह्म तैः वैकृतेः ध्वनिभिः न भिद्यते। स तु एक एव। अतः स्फोटे वैकृतध्वनिकृतो वृत्तिकालभेदव्यवहारः भवति। प्रथमं यदुच्चारणं भवति स प्राकृतध्वनिः व्यञ्जकत्वेन अयं स्फोटस्य प्रकृतिभूतो भवति। प्रक्रियते स्वस्वरूपावस्था प्राप्यते यया सा प्रकृतिः। प्रकृतिरेव प्राकृतः। स्फोटस्य वर्णरूपोपलब्धौ मूलकारणरूपो ध्वनिः। वैकृतस्तु स्फोटाभिव्यक्त्यनन्तरं स्फोटे यत् कालकृतन्यूनाधिकतारतम्यं प्रतीयते तत्र हेतुर्भवति। बैकृतध्वनिः हि द्रुतमध्यमविलम्बित्तवृत्तिभेदकारणं भवति। तेन च स्फोटो न भिद्यते किन्तु ध्वनिरेव भिद्यते। विकृत्या भवः वैकृतः इति।

तथा चोक्तं हरिणा –

4. भर्तृहरिः, २०७२, पृ. १३२ अत्र स्फोटस्य शब्दस्य तारतम्यं प्रदर्श्यते ।

**शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदं तु वैकृताः। ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते।।** [5] इति।

नित्यः स्फोटरूपः शब्दः बुद्धौ सन्निविष्टः अभिव्यञ्जकध्वनेः असंसर्गे सति अज्ञानावरणेन अव्यक्तस्तिष्ठति। स हि ध्वनिसंसर्गेण व्यक्तरूपः श्रवणज्ञानविषयो भवति। ध्वनिना शब्दज्ञानकरणस्य श्रोत्रेन्द्रियस्य संस्काराख्यः उपकारः क्रियते, इत्येकः पक्षः। अथवा ज्ञानविषयस्य शब्दस्यैव केवलमुपकारः क्रियते इति द्वितीयः पक्षः। अथवा शब्देन्द्रिययोरुभयोरेव उपकारः क्रियते इति तृतीयः पक्षः। एतेषु त्रिषु कतमः पक्षः गरीयान् इति जिज्ञासायां सिद्धान्तिनः वदन्ति विषयेन्द्रिययोः उभयोः संस्कारः अभ्युपेयः, यतो हि श्रोत्रेण सह शब्दस्य सन्निकर्षे सति शब्दस्य साक्षात्कारो जायते। तदभावे तु न जायते इत्यन्वयव्यतिरेकाभ्यां यो ध्वनिः कल्प्यते स स्वोपरागेण शब्दम् अभिव्यज्य तस्मिन् श्रोत्रग्रहणविषयत्वयोग्यतां सम्पाद्य आन्तरं शब्दविषयम् अनुगृह्णाति। श्रोत्रदेशं चोपगतः स ध्वनिः स्वद्वारेण सन्निकर्षबलात् शब्दग्रहणयोग्यतां सम्पाद श्रोत्रेन्द्रियं चानुगृह्णाति। एवं प्रकारेण ध्वनिना विषयेन्द्रिययोः उभयोरपि संस्कारः क्रियते। अत एव ध्वनेः जन्माभावे अप्राप्तसंस्कारः अव्यक्तः शब्दः नैव श्रोत्रेन्द्रियस्य ग्रहणविषयत्वं याति। श्रोत्रञ्चासंस्कृतम् अन्तरेण असन्निकृष्टं नैव शब्दग्रहणयोग्यं भवति। अतः उभयोः संस्कारः इष्टः। एतत् स्पष्टीकर्तुं भर्तृहरिः आह-

**इन्द्रियस्यैव संस्कारः शब्दस्यैवोभयस्य वा। क्रियते ध्वनिभिर्वादास्त्रयोऽभिव्यक्तिवादिनाम्।।**[6] इति।

इदानीं पूर्वोक्तेषु त्रिषु पक्षेषु वादेषु वा प्रथमं द्वितीयं चेति पक्षद्वयं सदृष्टान्तमुपपादयति ग्रन्थकारः। उच्यते च कारिका -

**इन्द्रियस्यैव संस्कारः समाधानाञ्जनादिभिः। विषयस्य तु संस्कारः तद्गन्धप्रतिपत्तये॥** [7] इति।

कारिकायाः अस्याः आशयोऽयं- चित्तैकाग्रतान्तःकरणस्य मनसः बहिरिन्द्रियेण योगविशेषः एव समाधानरूपः, अञ्जनं = नेत्रशोधकं द्रव्यम्। आध्यमलौकिकं युक्तानां युञ्जानानां वा योगिनां भवति, एवञ्च दिव्यदृष्टीनाम ऋषीणामपि भवति। समाधानेन तेषाम् अतिशयाहितं चक्षुः सूक्ष्मातीन्द्रियधर्माधर्मदर्शनसमर्थं व्यवहितविप्रकृष्ट -वस्तुदर्शनसमर्थञ्च भवति।

द्वितीयं समाधानन्तु जनसाधारणं लौकिकं प्रत्यक्षमात्रं प्रति कारणं भवति। प्रमादादिवशात् मनसः अनवधाने सत्यपि विषयेन्द्रियसम्प्रयोगे प्रत्यक्ष्यस्य अनुपपत्तिः एव। अत एव प्रियध्यानमग्ना शकुन्तला पुरोऽवस्थितम् अपि ऋषिं दुर्वासनं न ददर्श, नापि तस्य शापवचः शुश्राव।

यथा- गन्धादिविषयस्य संस्कारस्तु आतपशुष्कतायाः पृथिव्याः उदकेन भवति। पृथिवीगन्धप्रतिपत्तये तस्याः उदकसेकेन संस्कारः क्रियते न तु घ्राणेन्द्रियस्य संस्कारः। तथा ध्वनिभिरपि शब्दस्य विषयस्य संस्कारः क्रियते न तु श्रोत्रेन्द्रियस्येति भावः।

एवम् अनया कारिकया उदाहरणद्वयेन बोधितं यत् प्राकृतध्वनिना शब्दाभिव्यक्तये श्रोत्रेन्द्रियस्यैव संस्कारः क्रियते, न तु विषयस्य शब्दस्य। अथवा ध्वनिना विषयस्यैव संस्कारः क्रियते न तु श्रोत्रस्य।

इदानीं ग्रन्थकारः दृष्टान्तेन तृतीयपक्षमुपपादयति-

**चक्षुषः प्राप्यकारित्वे तेजसा तु द्वयोरपि। विषयेन्द्रिययोरिष्टः संस्कारः स क्रमो ध्वनेः॥** [8] इति।

अर्थात् प्रदीपादीनां तेजसा घटादिविषयस्य अथ च चक्षुरादीन्द्रियस्य संस्कारः क्रियते। अत एव प्रकाशाभावे इन्द्रियविषययोः समवधानेऽपि अन्धकारे नैव विषयग्रहो भवति। एवमेव ध्वनिरपि श्रोत्रेन्द्रियं शब्दञ्च संस्करोति।

अत एव ध्वनिसंस्कृतश्रोत्रेण ध्वनिसंस्कृतशब्दस्यैवोपलब्धिर्भवति, न तु दूरस्थेन इन्द्रियेण न वा घटध्वनिना।

ततः उच्यते श्लोकः- **स्फोटरूपविभागेन ध्वनेर्ग्रहणमिष्यते। कैश्चिद् ध्वनिरसंवेद्यः स्वतन्त्रोऽन्यैः प्रकल्पितः॥** इति।

---

5. भर्तृहरिः, २०७२, पृ. १३२ अत्र शब्दस्य तारतम्यं प्रदर्श्यते। 6. न्यायकुमुदचन्द्रम्, श्लो.सं. ७९ 7. वाप १.८१

8. चक्षुप्राप्यकारित्वात्, श्लो.सं. ७९

श्रोतृणां कृते ध्वनिना स्फोटोऽभिव्यज्यते, वक्तृणां कृते स्फोटेन ध्वनिरेवाभिव्यज्यते। तत्र ध्वन्यभिव्यक्तिविषये मतत्रयमस्ति। तत्र प्रथमं मतं- ध्वनेः ग्रहणं स्वतन्त्ररूपेण न भवति। स्फोटस्य यद्रूपं भवति, तेन रूपेण संमिश्रस्यैव ध्वनेः ग्रहणं भवति। यथा स्फटिकादेः जपाकुसुमादेः लौहित्योपरागभेदेन ग्रहणमिति।

द्वितीयमतं भवति- ध्वनिः असंवेद्यः एव भवति। अथापि ध्वनिना स्फोटो गृह्यते। यथा- चक्षुरादीनि इन्द्रियाणि स्वयं न गृह्यन्ते, न ज्ञायन्ते च। केवलं तानि स्वविषयग्राहकाणि भवन्ति। एवमेव ध्वनिः स्वयं स्वतन्त्रतया स्फोटादविभक्तभावेन अगृह्यमाणः सन् स्फोटग्राहको भवति।

तृतीयमतं- ध्वनिः संवेद्यो भवति किन्तु स्वतन्त्ररूपेणैव, न तु स्फोटरूपाविभागेन। अत एव दूरात् ध्वनेः ग्रहणं ध्वनित्वेनैव भवति तत्र स्फोटग्रहो नैव भवति।

स्फोटः अखण्डः अनवयवश्च भवति, ध्वनयस्तु सावयवाः। तत्र स्फोटः एकेन आद्येन ध्वनिना गृह्यते चेत् अन्यध्वनीनां वैयर्थ्यम्। एवमेव यदा अन्त्येन ध्वनिना स्फोटाभिव्यक्तिः तदा पूर्वध्वनीनां व्यर्थता। अतः भर्तृहरिः आह- प्रत्येकं ध्वनिभिः बुद्धौ संस्कारः संस्थाप्यते, तदनन्तरं बुद्धौ स्फोटग्रग्रहणसामर्थ्यमुदेति, ततः पूर्वपूर्वध्वनिजनितसंस्कारसहकृतः अन्त्यः ध्वनिः स्फोटं व्यञ्जयति। यथा रत्नपरीक्षकः रत्नं पुनः पुनः अवलोकनेन रत्नस्य शुद्धतां ज्ञातुं दृढनिश्चयवान् भवति, तथैव प्रथमध्वनिना स्फोटः अस्फुट इव भासते, द्वितीयेन ध्वनिना पूर्वध्वनिसंस्कारवशात् स्फोटस्य स्फुटता किञ्चित् प्रकाश्यते। अन्त्येन ध्वनिना तु तस्य स्फोटस्य स्फुटतमः प्रकाशो जातः। अतः स्फोटप्रकाशने पूर्वध्वनीनामपि उपयोगिताऽस्ति अन्त्यध्वनेरप्यस्ति इति भावः।

ततः ध्वनीनां भिन्नत्वं प्रतिपाद्यते। अर्थात् वर्णपदवाक्यरूपस्य स्फोटस्य व्यञ्जकाः ध्वनयः भिन्नाः भवन्ति। यतो हि ते ध्वनयः भिन्नभिन्नप्रयत्नप्रेरिताः भवन्ति। वर्णस्फोटव्यञ्जकध्वनिः भिन्नः, पदस्फोटव्यञ्जकध्वनिर्भिन्नः वाक्यस्फोटव्यञ्जकध्वनिश्च भिन्नः। किन्तु तेषामत्यन्तभेदेऽपि समानश्रुतित्वज्ञानात् संकीर्णा इव भवन्ति। अत एव निरवयवेष्वपि वाक्येषु पदवर्णादिप्रतीतिर्भवति।

इयं घटपदमित्यनुगतप्रतीत्या घटोपस्थितिं प्रति घटपदज्ञानत्वेन हेतुना तदवच्छेदकतया च सिद्धा घटपदत्वादिरूपा जातिः क्रमजन्मभिः नानावर्णव्यक्तिभिः अभिव्यज्यते। वर्णाश्च ध्वनिरूपाः, तैः अभिव्यक्ता सती जातिः अर्थबोधिका। तेन नित्यत्वेन जातेः सर्वदा विद्यमानत्वेनापि व्यञ्जकवर्णरूपध्वनीनाम् असमवधाने एकैकसमवधाने वा नार्थबोधप्रसङ्गः। जातेः अनेकव्यक्तिपर्याप्तत्वेन कतिपयवर्णव्यक्तिमात्रेण अभिव्यक्तिर्न भवति। व्यज्यते अनया सा व्यक्तिः। ध्वन्यते व्यज्यते अनेन सः ध्वनिः इति करणव्युत्पत्त्या व्यक्तिध्वनिशब्दयोः पर्यायत्वमपि अत्र बोध्यम्। यथा घटत्वादिजातिं विना लोके घटगवादिव्यक्तिः अव्यपदेश्या, जात्या व्यावृत्तानुवृत्तप्रत्ययविषया सती घटगवादिव्यपदेशं लभते। तथा उत्पत्तिमत्यः अनित्याः वर्णव्यक्तयः घटगोपदत्वादिजातिं विना अव्यपदेश्याः। जात्यैव व्यावृत्तानुवृत्तघटगवादिव्यपदेशं भजन्ते। इत्थं च घटादिशब्दव्यक्तीनां व्यपदेशो हेतुभूता घटपदत्वादिजातिः स्फोट इति कथ्यते। जातिवादिनां मते अनेकवर्णव्यक्तिभिः अभिव्यङ्ग्या या जातिः अस्ति सैव स्फोटवाचको भवति। अथ च घटादिपदत्वरूपायाः जातेः व्यञ्जकत्वेन व्यक्तस्य एव स्वीक्रियन्ते। व्यक्त्याश्रयजातिः एव बोधिकेति तात्पर्यम्। अतः हरिणा उक्ता कारिका—

"अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता। कैश्चिद् व्यक्तय एवास्याः ध्वनित्वेन प्रकल्पिताः" इति

ये जनाः घटपदत्वादिजातिं न स्वीकुर्वन्ति, केवलं नित्यमेकं शब्दतत्त्वमेव स्वीकुर्वन्ति तेषां व्यक्तिस्फोटवादिनां मतमत्र निरूप्यते।—

**अविकारस्य शब्दस्य निमितैर्विकृतो ध्वनिः। उपलब्धौ निमित्तत्वमुपयाति प्रकाशवत्॥** [9] इति।

---

9. वाक्यपदीयम्, ब्रह्मकाण्डम्, का. सं. 94

अर्थात् जातिस्फोटस्तावत नोपयुक्तः शब्दव्यक्तिभेदे सति तत्र जातिः सिध्येत्, आश्रयाश्रयिभावे सति ध्वनिस्फोटयोः जातिव्यक्तिव्यवहारः प्रवर्तेत, तदिदं द्वयमपि ध्वनिस्फोटयोः नोपलभ्यते। न हि स्वभावतः नित्यं शब्दतत्त्वं भिद्यते, येन कापि जातिः स्वीक्रियेत। वायोः स्थानकरणाभिघातो हि ध्वनेरेव भेदे निमित्तं न तु शब्दतत्वभेदे। नापि ध्वनिस्फोटयोः आश्रयाश्रयिभावः, नहि ध्वनेराश्रयः स्फोटः, मुखस्य दर्पणमिव स्फोटस्योपधायकः ध्वनिः। अतः तयोः व्यङ्ग्यव्यञ्जकभावः एव। अतः अत्र ध्वनिस्फोटयोः व्यक्तिजातिभ्यां वैलक्षण्यदर्शनाद् जातिस्फोटवादः न विचारयोग्यः। किन्तु प्रकाशप्रकाश्ययोः दीर्घघटयोः इव शब्दस्वरूपग्रहे निमित्तनिमित्तिभाव एव। यथा प्रदीपादिः प्रकाशः घटादीन् अर्थान् प्रकाशयति, न तु तान् विकारयति नापि विभिनत्ति। तथा करणभेदैः भिन्नाः ध्वनयः परिणामिनः नित्यमेकमपरिणामिशब्दतत्त्वं स्वानुरूपं प्रकाशयन्ति न तु तत् शब्दतत्त्वं विकृतं कुर्वन्ति, नापि तस्य स्वरूपभेदमानयन्ति। नित्यस्य स्फोटस्य सर्वदोपस्थितिः व्यञ्जकध्वनेः समवधाने सत्येव भवति। एतावत्पर्यन्तमस्माभिः ज्ञातं यत्- अर्थवाचकत्वं स्फोटे भवति, न तु ध्वनिषु। अतः ध्वनयः निरर्थिकाः भेर्याघातवत्। किन्तु अन्तरेण ध्वनिं स्फोटस्य उपलब्धिरेव न स्यात्, तस्मात् स्फोटनादयोः कश्चन सम्बन्धो वाच्यः। अत्र स्फोटनादयोः व्यङ्ग्यव्यञ्जकभावसम्बन्धो वर्तते। किन्तु व्यङ्ग्यव्यञ्जकभावः सामानाधिकरणस्यैव भवति, यथा-घटप्रदीपयोः व्यङ्ग्यव्यञ्जकभावसम्बन्धो लक्ष्यते। स्फोटनादयोः भिन्नदेशस्थत्वात् कथं स सम्बन्धः? तत्रोच्यते कायवतां मूर्तपदार्थानां सम्बन्धो भवति, अमूर्तस्य शब्दस्य व्यापकत्वात् सामानाधिकरण्यं भवत्येव। किञ्च स्फोटनादयोः भिन्नदेशस्वीकारेऽपि हृदयाकाशश्रोत्राकाशयोरौपाधिकभेदेऽपि वास्तवभेदाभावात् न काचित् हानिः।

*** शाब्दिकनये शब्दतत्त्वस्वरूपम्**

संस्कृतवाङ्मये शब्दा अनन्ताः। शब्दानां सूक्ष्मभूतः परिचयो वर्ण एव। वर्णानां समुदाय एव शब्दः। अनेके वर्णाः सम्भूय शब्दोत्पत्तिर्भवति। महाभाष्यदिशा ध्वनिः शब्दः। शब्दादर्थोत्पत्तिः कथं भवतीति प्रश्ने केचन वर्ण एवार्थजनक इति चिन्तयन्ति। शाब्दिकास्तु वर्णातिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छन्ति। तेऽर्थोत्पत्तेः कारणत्वेन स्फोटं स्वीकुर्वन्ति। तेषां मते स्फुटति प्रकाशतेऽर्थोऽस्मादिति स्फोटः। अस्मिल्लँघुशोधप्रबन्धे मया क्रमशो वर्णाच्छब्दः शब्दादर्थोत्पत्तिश्च कथं जायत इति यथामति प्रदर्शितम्।

**कुटशब्दाः-** स्फोटः, शाब्दिकाः, वर्णस्फोटः, पदस्फोटः, जातिस्फोटः इत्यादयः।

महाभाष्येऽस्ति - 'कस्तर्हि शब्दः ? येनोच्चारितेन सास्नालाङ्गलककुदखुरविषाणिनां संप्रत्ययो भवति। स शब्दः' इति अर्थाद् वर्णसमूह एव शब्दः। जनैर्वर्णा उच्चारिता भवन्ति। यस्मिन्नुच्चारिते सास्नादिविशिष्टवस्तुनो ज्ञानं भवति स शब्दः। ग् औः चेत्युच्चारिते सति सास्नादिविशिष्टवस्तुनो ज्ञानं भवति। अतो गकारः, औकारः विसर्गश्चेति वर्णा हि शब्दः। तपरस्तत्कालस्य (१/१/७०) इति सूत्रभाष्ये भाष्यकारेण स्फोटो हि शब्दस्वरूपमिति व्याख्यायते। आचार्येण भतृहरिण त्वदीये वाक्यपदीये विस्तृततया भाष्यमतं व्याख्याय शब्दस्य स्फोटस्वरूपता प्रतिपादिता। पस्पशाह्निके 'येनोच्चारितेन' इत्यास्यार्थः कैयटानुसारं 'येन प्रकाशितेन' इति। वैयाकरणा वर्णातिरिक्तं पदं वाक्यं वा वाचकत्वेन स्वीकुर्वन्ति। वर्णा अर्थवाचका इत्युक्ते सति प्रत्येकं वर्णा अर्थवाचका उत वर्णसमुदाय इति विकल्पे समुपस्थिते प्रत्येकं वर्णा अर्थवाचका इति चेत् प्रथमवर्णादेिव अर्थज्ञानं सम्भवतिःद्वितीयादिवर्णानामानर्थक्यमिति भवति।

पुनश्च वर्णसमुदायो वाचक इति स्वीकुर्मश्चेद् वर्णोत्पत्तिपक्षे युगपत् समस्तवर्णा-नामुत्पत्तिर्भवितुं न शक्यत इत्यतो युगपत् समुदायवर्णावस्थानाभावेऽर्थज्ञानानुपपत्तिर्भवति। अन्यत्र वर्णाभि-व्यक्तिः स्वीक्रियेत चेदियमभिव्यक्तिः क्रमशो भवतीत्यतो युगपत्सक-लवर्णो-पस्थितेर-भावतोऽर्थज्ञानानुपपत्तिर्भवति। आदौ वर्णानां क्रमशोऽभिक्तिर्भवति तदनु समुदा-यवर्णाः कश्चन स्मृतेर्विषयो भूत्वा युगपदर्थबोधं कारयतीति चेत् 'रसः सरः' इति विपरीतक्रमेण ज्ञातवर्णसमुदायत एकरूपार्थज्ञानापत्तिर्भवति। एतदर्थं वर्णातिरिक्तेन नादेन ध्वनिना वा अभिव्यङ्गः स्फोटो हि शब्दस्वरूपमिति साधु भवति। अयमेव स्फोटो ह्यर्थस्य वाचको भवति। आचार्यो नागेशभट्टः प्रदीपोद्योते भाषे समुच्चारितस्य 'उच्चारितेन' 4 इत्यस्यार्थः शरीराभ्यन्तरान्नाम मूलाधारतो नाभितो वा यो वायुरुत्तिष्ठति तस्याभिघातसंयोगेन कण्ठादि

स्थानैरवय-वक्रमेणाभिव्यक्तं यद्वस्तु (स्फोटः) तेन इति। अत उक्तमहा-भाष्यपतेरर्थो यद् सति सास्नालाङ्गुलादि-विशिष्टवस्तुनः प्रतीतिर्भवति स शब्दः। इदानीं शब्दात्कथमर्थज्ञानं भवतीति वर्ण्यते। कस्यचनापरस्यार्थज्ञानाय वयं शब्दं प्रयुञ्ज्महे। तेनापरस्यार्थज्ञानं भवति। इदमर्थज्ञानं कथं भवतीति विषये विद्वांसो विविधसिद्धान्तेषु समुपनीता भवन्ति। तेषु विद्वत्सु न्यायवैशेषिकाणां मतेन अकारादिवर्णा नश्वराः। उच्चारणप्रयत्नेनाकारादिवर्णानामुत्पत्ति-द्वितीयक्षणे स्थितिः तृतीयक्षणे च विनाशो भवति। एवमुत्पत्ति-विनाशशीलवर्णसमुदायः पदं तेषाञ्च समुदायो वाक्यम्। इदंसिद्धान्तानुसारं समुदाये विद्यमानं प्रत्येकं समुदायादभिन्नत्वात् पदं वाक्यं वा वर्णादतिरिक्तं किमपि वस्तु न। एतेषां मतानुसार-मकारादिवर्णा असङ्ख्याः। यस्मिन्नभिव्यक्ते जैमिनिमतावलम्बिनामध्वरमीमांसकानां नये अकारादयो न त्वसङ्ख्याः। तेऽकारादयः प्रत्येकं वर्णा नित्या विभवश्चेति मन्यन्ते। कण्ठताल्वाद्युच्चारणस्थानेषुवायोर्विचित्रसंयोगतः वर्णानामभिव्य-क्तिर्भवति न तूत्पत्तिः। अभिव्यक्तिविशिष्टस्य वर्णस्य समुदायो हि पदं पदसमुदायश्च वाक्यमिति। वाक्यादेवार्थप्रतीतिर्भवतीति विषये सर्वेषां मतैक्यमस्ति। न्यायवैशेषिकानुसारं द्वितीयवर्णस्थितौ प्रथमवर्णो नश्यति। घट इत्यत्र घ् अ ट् अ इति चत्वारो वर्णाः सन्ति। घटशब्दस्यान्तिमस्याकारस्य स्थितौ पूर्ववर्तिनः त्रयो वर्णा विनश्यन्ति। इत्यवस्थायां वर्णचतुष्टयस्य युगपत् स्थितेः सम्भावना नास्ति। अतो तेषां युगपत् स्थितेरभावात् तेषां युगपत्प्रत्यक्ष्यमपि न सम्भवति। परवर्तिवर्णानां क्रमिकप्रत्यक्षं भवति, तस्माच्च संस्कार उत्पद्यते। प्रत्यक्षज्ञानजनितेन तेन संस्कारेण सहान्तिमवर्णस्य यत्प्रत्यक्षं तदेव पदप्रत्यक्षम्। अनेन च पदज्ञानं भवति। यस्मात्पदात् यस्यार्थस्य ज्ञानं भवति तेनार्थेन सह तस्य पदस्य कश्चन सम्बन्धोऽस्ति। घटशब्देन घटपदार्थस्यैवायं सम्बन्धो वर्तते, पटपदार्थेन घटशब्दस्यार्थज्ञानजनकः सम्बन्धो नास्ति। अतो घटशब्दाद् घटस्यैव ज्ञानं न तु पटस्य ज्ञानं भवति। शब्दार्थयोरयं सम्बन्धः शक्तिरित्युच्यते। यस्येदं शक्तिज्ञानमस्ति तस्य पूर्वोक्तरूपेण शब्दज्ञानादर्थप्रतीतिर्भवति। द्वयोर्वस्तुनोः परस्परं यः सम्बन्धो वर्तते तस्य सम्बन्धस्य ज्ञानमस्ति चेदेकस्य ज्ञाने सत्यपरस्य वस्तुनः स्मरणं भवति, यथा हस्तिदर्शने हस्तिचालकस्य स्मरणम्। अनया च पद्धत्या शब्दादर्थप्रतीतिर्भवति।

मीमांसकनये तु यद्यपि वर्णा नित्याः तथापि तेषां वर्णानां ज्ञानं सर्वदा न वर्तते। उदाहरणरूपेण घटवस्तुनि पूर्वतो विद्यमानेऽपि तमसि घटप्रत्यक्षं न भवति। घटेन सह यदालोकसम्बन्धो भवेत्तदा घटप्रत्यक्षं भवेत्। अयमालोको घटस्याभिव्यञ्जकः। अनेन नित्यवर्णेषु सदैव विद्यमानेषु सत्स्वस्माकं श्रोत्रदेशस्थवाह्यवायुना ते आवृताः सन्ति। यदा केनाप्युच्चारणं क्रियते तदा तस्य शरीराभ्यन्तरस्थवायुः कण्ठताल्वादिस्थानेष्वभिव्यक्तो भूत्वा मुखेन बहिर्निर्गच्छति। तस्य मुखनिर्गतस्य वायोः संयोगविभागाः श्रोत्रदेशस्थवाह्यवायु-मपसारयन्ति। तदा च वर्णो वर्णसमूहात्मकं पदं वाक्यं वाभिव्यक्तं भवति, प्रत्यक्षीभवति वा। इदं वायवीयसंयोगविभागरूपाभिव्यञ्जकं न वर्तते तदा वर्णाभिव्यक्तिर्न भवति। अभिव्यक्तिरेव ज्ञानमित्युच्यते। इदं ज्ञानं त्रिक्षणस्थायिपदार्थः। प्रथमे क्षण उत्पत्तिः द्वितीये स्थितिः तृतीये च विनाशः। अतो वर्णेषु नित्येषु सत्स्वप्यभिव्यक्तिविशिष्टवर्णस्य स्थायित्वं क्षणद्वयमेव। अतो मीमांसानये वर्णसमुदायात्मकपदस्य सर्वेषां वर्णानां युगपदेकस्मिन्नेव कालेऽनुपपन्नत्वाद् युगपदेव सर्वेषां वर्णानां प्रत्यक्षं भवितुं नार्हति। अतश्चैतेषां मतेनापि कस्यचन शब्दस्य पदस्य वा पूर्ववर्तिवर्णानामनुभवाद् यः संस्कारो जायते तेन सहान्तिमवर्णस्य ज्ञानं हि पदज्ञानम्। अस्मात्पदज्ञानदेवार्थज्ञानं जायते। एतेषां मतानुसारं पदेन सह पदार्थस्य प्रत्याय्यप्रत्यायकसम्बन्धत्वात् पदज्ञानात् सम्बन्धज्ञानेन पदार्थोपस्थितिर्भवति। वैयाकरणा उपर्युक्तं मतद्वयं नाङ्गीकुर्वन्ति। तेषां नये पूर्वपूर्ववर्णानां संस्कारेणान्तिमवर्णज्ञानं पदज्ञानत्वेन स्वीक्रियते चेत् यत्रैकवर्णोच्चारणात् किञ्चिद्विरामेणान्तिमवर्णोच्चारणं क्रियते तत्रापि पदज्ञानं भवितुमर्हति।

अतः तत्राप्यर्थज्ञानमनिवार्यं भवति। किन्त्वेतादृशस्थल इत्थमुच्चारितवर्णेभ्योऽर्थप्रतीतिर्भवतीति कोऽपि न स्वीकुर्वन्ति। वैयाकरणा अपि वर्णसमुदायादर्थप्रतीतिं नाङ्गीकुर्वन्ति। ते स्फोटं स्वीकुर्वन्ति। यस्मादर्थप्रतीतिर्भवति सः स्फोटः। स्फोट इत्ययं शब्दः पङ्कजादिवत् योगरूढशब्दः। वैयाकरणा अष्टविधं स्फोटं स्वीकुर्वन्ति। यथा वर्णस्फोटः, पदस्फोटः (सखण्डपदस्फोटः), - वाक्यस्फोटः

(सखण्डवाक्यस्फोटः), अखण्डपदस्फोटः, अखण्डवाक्यस्फोटः, वर्णजातिस्फोटः, पदजातिस्फोटः वाक्यजातिस्फोटश्चेति। एते - स्फोटाः पारमार्थिका इति तु नास्ति। वाक्यस्फोटमवगमयितुं एते कल्पिताः सन्ति।

*** वर्णस्फोटः -**

'पचति' इति पदे पच् इति धातुः तिबिति प्रत्ययोऽस्ति। तयोर्शबिति विकरणं भवति। वैयाकरणा विकरणप्रत्ययार्थं नाङ्गीकुर्वन्ति। प्रकृतिप्रत्ययौ सम्भूय यदर्थप्रकाशरूपकार्यं साधयतो, विकरणं तस्मिन् कार्ये सहायतां करोति केवलं, स्वतन्त्रतया कमप्यर्थं न प्रकाशयति। यस्यार्थं प्रकाशयितुं सामर्थ्यमस्ति वाचकतास्ति वा स्फोट इति नाम्ना सोऽभिहितो भवति। क्रमिकवर्णसमूहा-दर्थप्रतीतिहेतोः क्रमिकवर्णसमूहः स्फोट इति शब्दवाच्यो भवति। इदमेव वर्णस्फोटस्य तात्पर्यम्। अयं पक्षो नैयायिकैर्मीमांसकैश्च स्वीकृतः किन्तु वैयाकरणैरस्वीकृतः

*** पदस्फोटः-**

एकस्मिन् पदे ये वर्णाः सन्ति तस्य वर्णसमुदायस्य कस्माच्चिदंशात् कोऽर्थः प्रकाशितो 12 भवतीति कथनं कठिनमस्ति। यतोहि व्यवहारक्षेत्रे केवलं प्रकृतेः केवलं प्रत्ययस्य व्यवहारो न भवति। प्रकृतिप्रत्ययविभागं प्रकल्प्य तत्र विभिन्नांशानां विभिन्नार्थाः सन्तीति निर्देशः कल्पनामात्रमेव। 'पचति' 'देवदत्त' इत्यादिपदेषु कल्पितप्रकृति-प्रत्यययोः स्वतन्त्ररूपेणार्थो नास्ति किमपि। किन्त्वेतेभ्यः पदेभ्यो यार्थप्रतीतिर्भवति सा समग्रपदेनैव प्रकाशिता भवति। व्यवहारक्षेत्रे पदं ह्यर्थज्ञानस्योपायः। अतोऽर्थप्रकाशसामर्थ्यं पदेऽस्त्येतदर्थं वर्णसमूहात्मकं पदं हि स्फोटः (वाचकम्)। प्रकृतिप्रत्ययोर्वाचकता नास्तीति पदस्फोटपक्षः।

*** वाक्यस्फोटः -**

प्रतिपदं पृथक् प्रयोगेण तस्माल्लोकव्यवहारोपयोग्यर्थज्ञानं न भवति। वयमस्माकं भावं प्रकटीकर्तुं केवलं पदस्य प्रयोगमकृत्वा वाक्यं प्रयुञ्ज्महे। अन्येऽपि स्वाभिमतं व्यक्तीकर्तुं वाक्यमेव प्रयुञ्जते। अतो वाक्यं ह्यर्थज्ञानस्य साधनमस्ति। अर्थज्ञानस्यानुकूलशक्तिर्वाक्य एवास्ति। एतद्वाक्यमेव क्रमिकवर्णसमष्टिः। अयं वाक्यस्फोटपक्षः।

*** अखण्डपदस्फोटः -**

पदं निरवयवम्। यथा वर्णवादयो वर्णस्यावयवं नाङ्गीकुर्वन्ति, वर्णो निरवयवोऽखण्ड इति स्वीकुर्वन्ति तथैवाखण्डपदस्फोटवादयः पदमखण्डत्वेनाङ्गीकुर्वन्ति। अस्मादेवास्माकमर्थज्ञानं जायते। अतोऽ-खण्डपद एवार्थप्रकाशकशक्तिर्वर्तते। अतोऽखण्डपदमेव वाचकमिति अखण्डपदस्फोटपक्षः।

*** अखण्डवाक्यस्फोटः -**

यथा पदमवयवहीनं तथैव वाक्यमपि निरवयवम्। वाक्यार्थ-ज्ञानाय पदानि वाक्यावयवरूपेण कल्पितानि। पदस्य नास्ति कापि पारमार्थिकसत्ता। अखण्डवाक्य एवार्थप्र-तीतेरनुकूलशक्तिरस्ति। अतोऽखण्डवाक्यमेव वाचकम (स्फोटः)। अयमेव अखण्डवाक्यस्फोटपक्षः। उपर्युक्ताः पञ्चस्फोटाः इत्यभिहिताः सन्ति।

*** वर्णजातिस्फोटः -**

महर्षिजैमिनिपूर्वमीमांसका जातिशक्तिवादिनः सन्ति। ते घटादिव्यक्तयो घटादिशब्दानां वाच्यत्वेन न स्वीकुर्वन्ति किन्तु घटत्वपटत्वजातिरेवघटादिशब्दवाच्येति मन्यन्ते। मीमांसकमतानुसारं जातिस्फोटवादिनश्चिन्तयन्ति यथा-घटादिपदार्थनिष्ठजाति-र्वाच्य-रूपेण स्वीकृता भवति तथैव शब्दनिष्ठजातेरपि वाचकत्वं स्वीकृतं भवति। अतः प्रकृतिः प्रत्ययश्चार्थस्य वाचकौ न किन्तु प्रकृतिप्रत्ययग-तजातिरेवार्थस्य वाचिका। इयं प्रकृतिप्रत्ययगतजातेर्वाचकता यस्मिन् मतेन स्वीक्रियते तन्मतमेव वर्णजातिस्फोटः। अत्र प्रकृतिप्रत्यय-निष्ठजातिर्हि वाचकः (स्फोटः)। अत्र च वर्णेन प्रकृतिप्रत्ययौ ज्ञेयौ।

*** पदजातिस्फोटः--**

कस्मिंश्चित्पदे प्रकृतिप्रत्ययस्य या समष्टिर्वर्तते तदन्तर्गतायाः प्रकृतेः प्रत्ययस्य च विभिन्नजातिर्वर्तते तासाञ्च वाचकता नास्ति। तासामर्थबोधानुकूलशक्तिरपि नास्ति। प्रकृतिप्रत्ययसमष्टिर्यत्पदं तत्र काचिज्जाति या चार्थवाचिका स्फोट इत्यभिधीयते। अयमेव पदजातिस्फोटपक्षः।

*** वाक्यजातिस्फोटः -**

व्यवहारकाले प्रतिपदं पृथक् न प्रयुज्यते। स्वकीयं ज्ञानमपरस्य पुरतः प्रकाशयितुमस्माभिः शब्दः प्रयुज्यते। अयञ्च शब्दव्यवहारः। वाक्येनैवायं व्यवहारः सम्पद्यते। यदि प्रतिपदमर्थज्ञानं भवेत् तर्हार्थज्ञानाय पदस्यैव प्रयोगः स्यान्न तु वाक्यस्य। अतः व्यवहारक्षेत्रे पदादेवार्थज्ञानं न भवति किन्तु वाक्येनैव भवति। अतो वाक्येनैवार्थप्रतीतिर्भवति। अर्थप्रकाशयितुं सामर्थ्यं वाक्ये न विद्यते। समानाकृतिविशिष्टेषु वाक्येषु काचन जातिरस्ति। वाक्यनिष्ठा सैव जातिरर्थवाचिका स्फोटो वेति।

आचार्यभतृहरिरखण्डवाक्यस्फोटं स्वीकरोति। तेन वाक्यपदीय एवं

भणितम् – **पदे न वर्णा विद्यन्ते वर्णेष्ववयवा इव । वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन।**।10 इति।

ऋलए ओ ऐ औ चेत्येतेषु यथाक्रमं र् ल् अ+इ अ+उ अ+ए अ+ओ चेति वर्णाः सन्तीति सामान्यतः प्रतीतावपि वस्तुत एते (ऋ-आदिवर्णाः) निरवयवा अखण्डाश्चेति मीमांसकादिवर्णवादिनः स्वीकुर्वन्ति। वर्णवादिनां मतानुसारं यथा वर्णा अखण्डाः स्फोटवादिनां मतानुसारं तथैव वाक्यमखण्डमवयवशून्यञ्च। वाक्यात्पदस्य पृथक् सत्ता नास्ति। केवलमवगमनार्थं वाक्ये पदस्यास्तित्वं कल्प्यते। आचार्येण भतृहरिणा स्वयमुक्तम्-

यथा पदे विभज्यन्ते प्रकृतिप्रत्ययादयः। आपोद्धारास्तथा वाक्ये पदानामुपवर्ण्यन्ते ॥ इति शम्।

शब्दस्य माहात्म्यविषये वाक्यपदीये उच्यते-

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् । विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः** ॥11 इति।

अर्थात् यत् अनादिनिधनम्, यत् अक्षरं ब्रह्म, यस्मात् सम्पूर्णजागतिकपदार्थस्य उत्पत्त्याद्यवस्था भवति। तदेव शब्दतत्त्वात्मकं ब्रह्म इति। पराशब्दस्वरूपं ब्रह्म नित्यम्, एकम्। अत एव परिवर्तनविरहितम्। तत्र वर्तमानं जगदिदम् अनित्यं परिवर्तनसहितं नामरूपभेदसम्पन्नम् तत्तु व्यवहारदशायाम् अनिर्वचनीयम्। परमार्थदृष्ट्या तु विवर्तभावमासादयति। एतस्मादेव व्यवहारदशायाम् अनिर्वचनीयरूपा जगतः प्रक्रिया उत्पत्तिस्थितिविनाशावस्था भवति।

तथा च ब्रह्म सत्यं जगन्मिथ्या नेह नानास्ति किञ्चन" हति सिद्धान्ताऽनुसारम् एकं ब्रह्म एव पारमार्थिकों सत्तां धारयति। तदेव अनादिनिधनं भवति। तदेव कदाचिदपि न क्षीयते। अतः एवाक्षरपदवाच्यमपि तदेव। तस्मादेव सर्वाणि भूतानि एषञ्च जगदुत्पद्यते विवर्त्तभावेन। तादृशं ब्रह्म एवं शब्दतत्त्वं भवति।

भर्तृहरिमते शब्दः ब्रह्मसदृशः। तथा चोक्तम्-

**ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम् । विवृतं शब्दमात्राभ्यः तास्वेव प्रविलीयते।**। इति।

बृंहयति पालयतीति ब्रह्म, स्वचैतन्यसम्पादनद्वारा जगदुद्भवस्थितिसंहारकारणम्, जगद्व्यवहारस्थितिनियामकं यत्, तद् ब्रह्म। "यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद् विजिज्ञासस्व तद् ब्रह्म" इत्यादिश्रुतिभिः तदेव प्रोच्यते। एतल्लक्षणं शब्दरूपे ब्रह्मण्यपि नितरां संघटते। वाचः ब्रह्मत्वविषयेऽपि श्रुतिषु पर्याप्तं प्रतिपादितमस्ति। तथाहि-

10. वाक्यपदीयम्, ब्रह्मकाण्डम्, का.सं 73 11. वाक्यपदीयम्, ब्रह्मकाण्डम्, का.सं 01

"वागेव विश्वा भुवनानि जज्ञे "वाग्वै ब्रह्म" "वाग्धि ब्रह्म" इति। नामरूपात्मकं सर्वं जगत् वर्तते। सर्वत्र यथा वेदान्तप्रतिपदितस्य ब्रह्मणः अनुवेधः वर्तते तथैव सर्वत्र शब्दानुवेधो भवत्येव। तदुक्तं-

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते । अनुविद्धमिव ज्ञानं सर्वं शब्देन भाषते।।** इति।

अतः शब्द एव ब्रह्म इति वैयाकरणसिद्धान्तो भवति। एतदेव "ओमित्येकाक्षरं ब्रह्म" इति श्रुत्याऽपि उच्यते।

जगदुपादानकारणं ब्रह्म एकं सत्यं चिरूपम् अद्वितीयं विद्यते। तस्यैव ब्रह्मणः विद्वांसः भिन्नभिन्नरूपेण प्रतिपादनं कुर्वन्ति। तदुक्तं वाक्यपदीये- **तदेकं प्रक्रिया भेदैः बहुधाः प्रविभज्यते ।।** इति।

एतस्यैव शब्दब्रह्मणः अङ्गोपाङ्गयुक्तं सम्पूर्णेऽपि वाक्यपदीयस्य प्रथमकाण्डे श्रीभर्तृहरिः निरूपितवान्।

## ग्रन्थसूची

* आचार्यनागेशः। १९२३। **परिभाषेन्दुशेखरः।** वैद्यनाथकृतगदाटीकासहितः। आनन्दाश्रमसंस्कृतग्रन्थावलिः। पुने ओरियेन्टल पुस्तकभाण्डारः।

* आचार्यपाणिनिः। २०१९। **पाणिनीयधातुपाठः।** प्रो मदनमोहनझा। दूरवाण्यां धातुरूपमाला इति ऐपमाध्यमेन।

* आचार्यभर्तृहरिः। १९६५ । **वाक्यपदीयम्।**Prof. K.V Abhvankar and Acharya V.P Limaye.University of Poona Sanskrit and Prakrit Series.

* आचार्यभर्तृहरिः।२००२।**वाक्यपदीयम्।** पण्डित-वेदानन्द-झा। मन्दाकिनी विद्वत्परिसरः। दिल्ली।

* आचार्यभर्तृहरिः।२००६।**वाक्यपदीयम्।** डाँ. शिवशङ्कर अवस्थी ।चौखम्बा सुरभारती प्रकाशन।

* आचार्यभर्तृहरिः।**वाक्यपदीयम्।** डाँ. रमाकान्त-उपाध्यायः।देहली-विश्वविद्यालयः।

* आचार्ययास्कः। निरुक्तम्। Vedic Literature of Collection. Maharshi University of Management.

* आचार्यविश्वनाथः। न्यायसिद्धान्तमुक्तावली। विलासिनीहिन्दीटीकासहिता। ज्वाला प्रसादः गौडः। शिवदत्तमिश्रचरणैः निर्ध्यायानुमोदितः।

* तर्कसंग्रहः। अन्नंभट्टः। इन्दुमतीव्यख्योपेतः। रामचन्द्रझा नारायणशास्त्री च। चौखम्बा संस्कृतसीरीज।

* तर्कसंग्रहः। अन्नंभट्टः। स्वोपज्ञटीकासहितः। काशीराम संध्या राठौर च। मोतिलालबराणसीदासः। 2007

* त्रिपाठी ब्रह्मानन्दः सम्पादकः। **व्याकरणशास्त्रेतिहासः।** २००८। वाराणसी। चौखम्बा सुरभारती प्रकाशन।

* न्यायसूत्रम्। महर्षिगौतमः।भाष्यचन्द्रटीकासहितम्। महेश झा। चौखम्बा संस्कृतसीरीज।

* पतञ्जलिः। २०१०। **व्याकरणमहाभाष्यम्** (मूलमात्रम्)। मिश्रः आत्मदेवः सम्पादकः। वाराणसी। चौखम्बा सुरभारती प्रकाशन।

* भट्टोजिदीक्षितः। २००८। **वैयाकरणसिद्धान्तकौमुदी** (बालमनोरमातत्त्वबोधिनी-व्याख्यासमन्विता)। महामहोपाध्यायशर्मागिरिधरः महामहोपाध्यायशर्म-परमेश्वरानन्देन च संशोध्य संपादिता। दिल्ली, मुम्बई, चेन्नई, कोलकाता, बंगलौर, वाराणसी, पुणे, पटना। मोतीलाल बनारसीदास।

* भारतीयदर्शनम्। डाँ सर्वोपल्ली राधाकृष्णन्। राजपालप्रकाशकः।2010.

* भारतीयदर्शनम्। प्रो मधुसूदन पेन्ना तथा डाँ कलापिनी अगस्ती। कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः। राष्ट्रहिताय संस्कृतम्। 2020.

* महर्षिः पतञ्जलिः। २०१७। **व्याकरणमहाभाष्यम्।** (सप्रदीपोद्योत-भावबोधिनी-हिन्दीव्याख्योपेतम्)। प्रो. जयशङ्करलालत्रिपाठी। चौखम्बा सुरभारती प्रकाशन। वाराणसी।

* महर्षिपाणिनिः। १९४५ । **अष्टाध्यायी।** शिक्षापरिभाषापाठ-अष्टाध्यायीगणपाठधातुपाठ लिङ्गानुशासनपाठसहिता अकाराद्यनुक्रमावतारितसूत्रसूचीपरिष्कृता। खेमराजश्रीकृष्णदास इत्यस्य श्रीवेङ्कटेश्वरमुद्रणालये प्रकाशितम्। मुम्बई।

* महर्षियास्कः। २००२। **निरुक्तम्।** क्लाइब रो। कोलकाता। अवधकिशोरसिंहः।

* युधिष्ठिरमीमांसकः। **संस्कृत व्याकरणशास्त्र का इतिहास।** काशी। भारतीय प्राच्यविद्या प्रतिष्ठान।

* वैशेषिकदर्शनम्। महर्षिकणादः। प्रसस्तपादभाष्यसहितम्। आचार्य उदयवीर शास्त्री। विजयकुरमारगोविन्द्रम्। हासनाबाद। 2019

* वैशेषिकदर्शनम्। महर्षिकणादः। प्रसस्तपादभाष्यसहितम्। आचार्यआनन्दप्रकाशः। आर्षसाहित्यम्। 2007.

* श्रीनागेशभट्टः। **लघुशब्देन्दुशेखरः** (शेखरदीपिकाव्याख्यासहितः)। महा महोपाध्ययः श्रीनित्यानन्दपन्तपर्वतीयः सम्पादकः। चौखम्भा प्रकाशनम्। वाराणसी।

* श्रीमत्कौण्डभट्टः।२०१२। **वैयाकरणभूषणसारः।** दीपिकाव्याख्यासहितः। श्रीरामकिशोरत्रिपाठी। चौखम्वासुरभारतीप्रकाशनम्। वाराणसी।

******************

**ISSN 2250-1711**

**Journal of Veda Samskrita Academy**

**A National Peer-Reviewed Research Journal**

**Volume : XXVI, July to December-2025**

# ಭಾರತೀಯ ಜ್ಞಾನಪರಂಪರೆಯಲ್ಲಿ ಇತಿಹಾಸ ಹಾಗೂ ಪುರಾಣಸಾಹಿತ್ಯಗಳ ಮಹತ್ತ್ವಪೂರ್ಣ ಪಾತ್ರ

**ಡಾ. ಕವಿತಾ ಬಿ**

ಸಹಾಯಕ ಪ್ರಾಧ್ಯಾಪಿಕಾ, ಸಂಸ್ಕೃತ ವಿಭಾಗ

ಶೇಷಾದ್ರಿಪುರಂ ಇನ್ಸ್ಟಿಟ್ಯೂಟ್ ಆಫ್ ಕಾಮರ್ಸ್ ಅಂಡ್ ಮ್ಯಾನೇಜ್ಮೆಂಟ್,

ಬೆಂಗಳೂರು - 560020, ಕರ್ನಾಟಕ

Email ID: eruditesan@gmail.com

ದೂರವಾಣೀ ಸಂಖ್ಯೆ: 8088710623

**ಪತ್ರಿಕೆಯ ಧ್ಯೇಯೋದ್ದೇಶಗಳು:-**

1. ಭಾರತೀಯ ಜ್ಞಾನಪರಂಪರೆಯ ಅನಂತ ವಿಚಾರಧಾರೆಯನ್ನು ಮತ್ತು ಅಗಾಧವಾದ ಜ್ಞಾನರಾಶಿಯನ್ನು ಅರಿಯಲು ಸಾಧ್ಯವಾಗುವುದು.
2. ಭಾರತೀಯ ಜ್ಞಾನಪರಂಪರೆಯಲ್ಲಿ ಇತಿಹಾಸ ಹಾಗೂ ಪುರಾಣಸಾಹಿತ್ಯಗಳ ಯೋಗದಾನ ಮತ್ತು ಮಹತ್ತ್ವವನ್ನು ಅಭ್ಯಸಿಸಬಹುದು.
3. ಭಾರತೀಯ ಜ್ಞಾನಪರಂಪರೆಯಲ್ಲಿ ಅಡಕವಾಗಿರುವ ಅಮೂಲ್ಯ ವಸ್ತು-ವಿಷಯಗಳ ಸಮಕಾಲೀನ ಪ್ರಸ್ತುತತೆಯ ಬಗ್ಗೆ ಅವಲೋಕಿಸಬಹುದು.

**ಮುಖ್ಯ ಪದಗಳು:-**

ಭಾರತೀಯ ಜ್ಞಾನಪರಂಪರೆ, ಇತಿಹಾಸ ಹಾಗೂ ಪುರಾಣಸಾಹಿತ್ಯ, ಪುರಾಣೇತಿಹಾಸಗಳು, ವಸ್ತು-ವಿಷಯ, ಪ್ರಸ್ತುತತೆ, ಸಾರ್ವಕಾಲಿಕ ವಿಚಾರಧಾರೆ, ಸಮಕಾಲೀನ ಚಿಂತನೆ, ವೈದಿಕಪುರಾಣ, ಶೈವಪುರಾಣ, ವೈಷ್ಣವಪುರಾಣ, ವಿಶ್ವಮಾನ್ಯತೆ, ವಿಶ್ವಚೇತನ, ವಿಶ್ವಕೋಶ, ವಿಶ್ವಮಾನವತೆ, ವಸುಧೈವ ಕುಟುಂಬಕಮ್, ಸರ್ವಭೌಮತೆ, ಆಧ್ಯಾತ್ಮಿಕತೆ, ಸರ್ವಾಂಗೀಣ ಉನ್ನತಿ ಮತ್ತು ಪ್ರಗತಿ, ಜೀವನ ನೀತಿ, ಪ್ರೀತಿ, ರೀತಿಗಳು......... ಇತ್ಯಾದಿ.

***ಪತ್ರಿಕೆಯ ಸಾರಾಂಶ:-**

ಭಾರತೀಯ ಜ್ಞಾನಪರಂಪರೆ ಮತ್ತು ಇತಿಹಾಸ-ಪುರಾಣಗಳಿಗಿರುವ ನಂಟು ತುಂಬಾ ಪ್ರಾಚೀನವಾದುದು ಮತ್ತು ಉತ್ಕೃಷ್ಟವಾದುದಾಗಿದೆ. ಸಾಹಿತ್ಯವು ಇತಿಹಾಸ ಮತ್ತು ಪುರಾಣವನ್ನು ತನ್ನ ಅಂತರಂಗದಲ್ಲಿ ಐಕ್ಯಗೊಳಿಸಿಕೊಂಡಿರುವ ನೆಲೆಯಾಗಿದ್ದು, ಸಾಹಿತ್ಯಕೃತಿಗಳಲ್ಲಿ ಅದರದೇ ಆದ ಪ್ರಾಧ್ಯಾನ್ಯತೆಯನ್ನು ಸರ್ವದಾ ಉಳಿಸಿಕೊಂಡು, ಬೆಳೆದು ಬಂದಿದೆ. ಜೊತೆಗೆ ಲಕ್ಷಾಂತರ ಕೃತಿಗಳ ರಚನೆಗೂ ಭದ್ರ ಬುನಾದಿಯನ್ನು ಕಲ್ಪಿಸಿಕೊಟ್ಟಿದೆ. ಸಹಜವಾಗಿಯೇ ಇತಿಹಾಸ ಹಾಗೂ ಪುರಾಣಗಳ ಜಗತ್ತು ಸಾಹಿತ್ಯ ಜಗತ್ತಿಗಿಂತ ಭಿನ್ನವಾದರೂ, ಒಂದಕ್ಕೊಂದು ಸ್ವಯಂ ಪರಸ್ಪರ ಅನ್ಯೋನ್ಯವಾಗಿ ಮೇಳೈಸಿಕೊಂಡು ಬೆಳೆದು ನಿಂತಿವೆ. ಅದರಂತೆ, ಸಾಹಿತ್ಯ ಜಗತ್ತಿನಲ್ಲಿ ಪುರಾಣೇತಿಹಾಸಗಳು ಸಮೃದ್ಧವಾದ ವಸ್ತುವಿನ್ಯಾಸವನ್ನೂ ಒದಗಿಸಿಕೊಟ್ಟಿವೆ. ಅಪೂರ್ವ ಕಲಾಕೃತಿಗಳ ಹಿಂದೆ ಪುರಾಣೇತಿಹಾಸವು ತನ್ನ ದೀರ್ಘವಾದ ಸುಬಾಹುಗಳನ್ನು ವಿಸ್ತಾರವಾಗಿ ಚಾಚಿಕೊಂಡಿದೆ. ಇದು ಒಂದು ನೆಲೆಯಲ್ಲಿ ತಾಯಿ—ಮಗಳ ಸಂಬಂಧದಂತೆ ಅಮೂಲ್ಯವಾದುದಾಗಿದೆ. ಸಾಹಿತ್ಯ ಮತ್ತು ಪುರಾಣೇತಿಹಾಸಗಳ ಒಡಂಬಡಿಕೆಯನ್ನು ಪರಾಮರ್ಶಿ ಸುವುದಾದರೆ, ಒಂದು ಸ್ತರದಲ್ಲಿ ಇವು ದೃಶ್ಯವೂ ಹೌದು, ಅದೃಶ್ಯವೂ ಹೌದು; ಮೂರ್ತವೂ ಹೌದು, ಅಮೂರ್ತವೂ ಹೌದು;ಪಾರವೂ ಹೌದೂ ಅಪಾರವೂ ಹೌದು; ಲೌಕಿಕವೂ ಹೌದು, ಅಲೌಕಿಕವೂ ಹೌದು. ಸಾಹಿತ್ಯದಲ್ಲಿ ಒಂದು ಬಗೆಯ ಸೂಕ್ಷ್ಮಪರ್ಯರೂಪಣವಿದ್ದರೆ;

ಪುರಾಣೇತಿಹಾಸದಲ್ಲಿ ಸ್ಥೂಲಪಠ್ಯರೂಪಣವಿರುತ್ತದೆ. ಪುರಾಣೇತಿಹಾಸಗಳ ಭಾಷೆ, ಶೈಲಿ, ಪಾತ್ರಪ್ರಪಂಚಗಳು ಸಾಹಿತ್ಯ ಕೃತಿಯ ಸಂದರ್ಭದಲ್ಲಿ ವಿಶೇಷ ಅಧ್ಯಯನಮಾರ್ಗವನ್ನೇ ಹುಟ್ಟುಹಾಕುತ್ತವೆ ಮತ್ತು ವಿಶ್ವಕೋಶದಂತೆ ಅಗಾಧವಾದ ವಿಷಯ-ವಸ್ತುಗಳನ್ನು ಒದಗಿಸುತ್ತವೆ. ಇದಕ್ಕೆ ಉತ್ತಮ ನಿದರ್ಶನವೆಂದರೆ, ಜಿನಸೇನನ 'ಪೂರ್ವಪುರಾಣ' ಸ್ಥೂಲಪಠ್ಯವಾದರೆ; ಪಂಪನ 'ಆದಿಪುರಾಣ' ಸೂಕ್ಷ್ಮಪಠ್ಯವೆನಿಸುತ್ತದೆ. ವೇದವ್ಯಾಸರ 'ಮಹಾಭಾರತ' ಸ್ಥೂಲಪಠ್ಯವಾದರೆ; ಗದುಗಿನ ನಾರಾಣಪ್ಪನ 'ಗದುಗಿನ ಭಾರತ'ವು ಸೂಕ್ಷ್ಮಪಠ್ಯವೆನಿಸುತ್ತದೆ. ಪುರಾಣಸಾಹಿತ್ಯವು ಭಾರತೀಯ ಅಭಿಜಾತ ಸಾಹಿತ್ಯದ ಸಂದರ್ಭಗಳಲ್ಲಿ ನಡೆದಿಹ ವಿಶೇಷ ಅಂತರ್ಪ್ರಕ್ರಿಯೆ, ಪುರಾಣೇತಿಹಾಸದಲ್ಲಿ ಬರುವ ವಸ್ತು, ಪಾತ್ರ, ರೂಪಕ, ಶೈಲಿ, ನೀತಿಪ್ರಜ್ಞೆ ಮತ್ತು ಪ್ರತೀಕಗಳು ಸಾಹಿತ್ಯದಲ್ಲಿ ಹೆಚ್ಚು ಚರ್ಚೆಗೆ ಒಳಪಟ್ಟಿವೆ. ಹೀಗೆ, ಸಾಹಿತ್ಯಕೃತಿಯ ಆಕೃತಿ ಮತ್ತು ಆಶಯಗಳು ಹಿಂದೆ ಮೂಲಪಠ್ಯವೊಂದು ನಿರಂತರವಾಗಿ ಕೆಲಸ ಮಾಡುತ್ತಿರುತ್ತದೆ.

***ಪೀಠಿಕೆ:-**

ಮಹಾಸಮುದ್ರದಂತೆ ವಿಸ್ತಾರವೂ, ವಿಶಾಲವೂ ಆದ ನಮ್ಮ ಭಾರತೀಯ ಜ್ಞಾನಪರಂಪರೆ ಮತ್ತು ಇತಿಹಾಸ-ಪುರಾಣಗಳಿಗಿರುವ ನಂಟು ತುಂಬಾ ಪ್ರಾಚೀನವಾದುದು ಮತ್ತು ಉತ್ಕೃಷ್ಟವಾದುದಾಗಿದೆ. ಸಾಹಿತ್ಯವು ಇತಿಹಾಸ ಮತ್ತು ಪುರಾಣವನ್ನು ತನ್ನ ಅಂತರಂಗದಲ್ಲಿ ಐಕ್ಯಗೊಳಿಸಿಕೊಂಡಿರುವ ನೆಲೆಯಾಗಿದ್ದು, ಸಾಹಿತ್ಯಕೃತಿಗಳಲ್ಲಿ ಅದರದೇ ಆದ ಪ್ರಾಧ್ಯಾನ್ಯತೆಯನ್ನು ಸರ್ವದಾ ಉಳಿಸಿಕೊಂಡು, ಬೆಳೆದು ಬಂದಿದೆ. ಜೊತೆಗೆ, ಲಕ್ಷಾಂತರ ಕೃತಿಗಳ ರಚನೆಗೂ ಭದ್ರ ಬುನಾದಿಯನ್ನು ಕಲ್ಪಿಸಿಕೊಟ್ಟಿದೆ. ಸಹಜವಾಗಿಯೇ ಇತಿಹಾಸ ಹಾಗೂ ಪುರಾಣಗಳ ಜಗತ್ತು ಸಾಹಿತ್ಯ ಜಗತ್ತಿಗಿಂತ ಭಿನ್ನವಾದರೂ, ಒಂದಕ್ಕೊಂದು ಸ್ವಯಂ ಪರಸ್ಪರ ಅನ್ಯೋನ್ಯವಾಗಿ ಮೇಳೈಸಿಕೊಂಡು ಬೆಳೆದು ನಿಂತಿವೆ. ಅದರಂತೆ, ಸಾಹಿತ್ಯ ಜಗತ್ತಿನಲ್ಲಿ ಪುರಾಣೇತಿಹಾಸಗಳು ಸಮೃದ್ಧವಾದ ವಸ್ತುವಿನ್ಯಾಸವನ್ನೂ ಒದಗಿಸಿಕೊಟ್ಟಿವೆ. ಅಪೂರ್ವ ಕಲಾಕೃತಿಗಳ ಹಿಂದೆ ಪುರಾಣೇತಿಹಾಸವು ತನ್ನ ದೀರ್ಘವಾದ ಸುಬಾಹುಗಳನ್ನು ವಿಸ್ತಾರವಾಗಿ ಚಾಚಿಕೊಂಡಿವೆ. ಇದು ಒಂದು ನೆಲೆಯಲ್ಲಿ ತಾಯಿ—ಮಗಳ ಸಂಬಂಧದಂತೆ ಅಮೂಲ್ಯವಾದುದಾಗಿದೆ. ಸಾಹಿತ್ಯ ಮತ್ತು ಪುರಾಣೇತಿಹಾಸಗಳ ಒಡಂಬಡಿಕೆಯನ್ನು ಪರಾಮರ್ಶಿಸುವುದಾದರೆ, ಒಂದು ಸ್ತರದಲ್ಲಿ ಇವು ದೃಶ್ಯವೂ ಹೌದು, ಅದೃಶ್ಯವೂ ಹೌದು; ಮೂರ್ತವೂ ಹೌದು, ಅಮೂರ್ತವೂ ಹೌದು; ಪಾರವೂ ಹೌದೂ ಅಪಾರವೂ ಹೌದು; ಲೌಕಿಕವೂ ಹೌದು, ಅಲೌಕಿಕವೂ ಹೌದು. ಸಾಹಿತ್ಯದಲ್ಲಿ ಒಂದು ಬಗೆಯ ಸೂಕ್ಷ್ಮಪಠ್ಯರೂಪಣವಿದ್ದರೆ; ಪುರಾಣೇತಿಹಾಸದಲ್ಲಿ ಸ್ಥೂಲಪಠ್ಯರೂಪಣವಿರುತ್ತದೆ. ಪುರಾಣೇ-ತಿಹಾಸಗಳ ಭಾಷೆ, ಶೈಲಿ, ಪಾತ್ರಪ್ರಪಂಚಗಳು ಸಾಹಿತ್ಯಕೃತಿಯ ಸಂದರ್ಭದಲ್ಲಿ ವಿಶೇಷ ಅಧ್ಯಯನಮಾರ್ಗವನ್ನೇ ಹುಟ್ಟುಹಾಕುತ್ತದೆ. ಇದಕ್ಕೆ ಉತ್ತಮ ನಿದರ್ಶನವೆಂದರೆ, ಜಿನಸೇನನ 'ಪೂರ್ವಪುರಾಣ' ಸ್ಥೂಲಪಠ್ಯವಾದರೆ; ಪಂಪನ 'ಆದಿಪುರಾಣ' ಸೂಕ್ಷ್ಮಪಠ್ಯವೆನಿಸುತ್ತದೆ. ವೇದವ್ಯಾಸರ 'ಮಹಾಭಾರತ' 1 ಸ್ಥೂಲಪಠ್ಯವಾದರೆ; ಗದುಗಿನ ನಾರಾಣಪ್ಪನ 'ಗದುಗಿನ ಭಾರತ'ವು ಸೂಕ್ಷ್ಮಪಠ್ಯವೆನಿಸುತ್ತದೆ.

***ವಿಷಯ ನಿರೂಪಣೆ:-**

'ಪುರಾಣಭವಂ ಪುರಾಣಮ್' ಎಂಬ ಸಾಮಾನ್ಯ ವ್ಯುತ್ಪತ್ತಿಯೂ ಪ್ರಸಿದ್ಧವಾಗಿದೆ.ಅಂದರೆ ಹಿಂದೆ ಆದದ್ದು ಅಥವಾ ನಡೆದದ್ದು ಪುರಾಣ ಎಂದಾಗಿದೆ. ಅದರಂತೆ, "ಅಥ ಪುರಾಣಂ ನಾಮ ವಿಶ್ವಸ್ಯ ಪೂರ್ವಾಸ್ಥಾನಿರೂಪಕಮ್ । 1 'ಮಹತ್ವಾತ್ ಭಾರವತ್ವಾತ್ ಚ ಮಹಾಭಾರತಮ್' ಇತಿ ಉಚ್ಯತೇ। ವ್ಯಾಸಾದಿ ಮುನಿಪ್ರಣೀತಂ ಪಂಚಲಕ್ಷಣಾನ್ವಿತಂ ಶಾಸ್ತ್ರಮ್"॥

ಪುರಾಣವೆಂದರೆ ಪ್ರಪಂಚದ ಪೂರ್ವಕಾಲದ ಅವಸ್ಥೆಯನ್ನು ನಿರೂಪಿಸುವುದಾಗಿ ವ್ಯಾಸರೇ ಮೊದಲಾದ ಶ್ರೇಷ್ಠ ಮುನಿಗಳಿಂದ ರಚಿತವಾದ ಪಂಚಲಕ್ಷಣ ಸಮನ್ವಿತವಾದ ಶಾಸ್ತ್ರವಾಗಿದೆ. ಪುರಾಣವನ್ನು ಶಾಸ್ತ್ರವೆಂದೇ ಪರಿಗಣಿಸಲಾಗಿದೆ. ಈ ಮೇಲಿನ ಶ್ಲೋಕದಲ್ಲಿ ಮೂರು ಮುಖ್ಯಾಂಶಗಳು ವ್ಯಕ್ತವಾಗಿವೆ.

1. ಪುರಾಣಮ್- 'ವಿಶ್ವಸ್ಯ ಪೂರ್ವಾವಸ್ಥಾ ನಿರೂಪಕಮ್'

2. ಪುರಾಣಮ್– 'ವ್ಯಾಸಾದಿ ಮುನಿಪ್ರಣೀತಮ್'

3. ಪುರಾಣಮ್–'ಪಂಚಲಕ್ಷಣಾನ್ವಿತಂ ಶಾಸ್ತ್ರಮ್' ಇತಿ.

ಇವುಗಳಲ್ಲಿ ಲೋಕದ ಸಮಸ್ತ ಅವಸ್ಥೆಯ ನಿರೂಪಣೆ, ವರ್ತನೆ, ಮನುಷ್ಯಸ್ವಭಾವ, ಪ್ರಕೃತಿಯ ನೆಲೆಗಳು, ವಿವಿಧ ಲಕ್ಷಣವಿಶೇಷಗಳಿವೆ. ಜೊತೆಗೆ, ವಂಶಾವಳಿ, ಸೃಷ್ಟಿಯ ವಿಸ್ತಾರ, ಲಯ, ಪುನಸ್ಸೃಷ್ಟಿ, ಮನ್ವಂತರದ ಮುಖ್ಯ ಘಟನೆಗಳಿವೆ. ಮಹಾಪುರಾಣಗಳು ಹದಿನೆಂಟು ಮತ್ತು ಉಪಪುರಾಣಗಳು ಹದಿನೆಂಟು ಸಂಖ್ಯೆಯಲ್ಲಿರುವುದು ಸಾಹಿತ್ಯದಲ್ಲಿ ಪ್ರಸಿದ್ಧವಾಗಿ ಪರಿಗಣಿತವಾಗಿದೆ. ಈ ಅಧ್ಯಯನದಲ್ಲಿ ಪುರಾಣವನ್ನು ಸಾಹಿತ್ಯದ ಅಂಶವಾಗಿಯೇ ನೋಡಿಕೊಂಡು ಬರಲಾಗಿದೆ. ಪ್ರಕೃತಿ ಮತ್ತು ಮನುಷ್ಯನ ಸ್ವಭಾವಗಳನ್ನು ಪುರಾಣಗಳು ಅನೇಕ ಬಗೆಗಳಲ್ಲಿ ಚಿತ್ರಿಸುತ್ತವೆ. ಇದರಿಂದ ವಿಶ್ವಚೇತನತ್ವದ ಅರಿವು ಉಂಟಾಗಲು ಸಾಧ್ಯವಾಗುತ್ತದೆ ಮತ್ತು ವಿಶ್ವಮಾನ್ಯತೆಯ ಪ್ರತೀಕವಾಗುತ್ತದೆ. ಅದರಂತೆ,, 'ಅಗ್ನಿಪುರಾಣ'ವು ಕಾವ್ಯ-ನಾಟಕ ಲಕ್ಷಣಗಳನ್ನು ವಿವರಿಸುತ್ತದೆ. ಪುರಾಣಗಳ ವರ್ಣನಾಶೈಲಿಯು ರೂಪಕ ಕಥನ, ಕಥ್ಯಕಥನ, ಆದರ್ಶಕಥನಗಳೆಂಬ ಮೂರು ನೆಲೆಗಳಲ್ಲಿ ಸಾಗುತ್ತದೆ. ಇಲ್ಲಿ ಆಲಂಕಾರಿಕ ಭಾಷೆಯಲ್ಲಿ ಸತ್ಯವನ್ನು ಹೇಳುವುದು ರೂಪಕ ಕಥನ; ಇರುವ ವಸ್ತುವನ್ನು ಸ್ವಾಭಾವಿಕ ರೂಪದಲ್ಲಿ ವರ್ಣಿಸುವುದು ತಥ್ಯಕಥನ; ಮುಂದಿನ ಆಗು-ಹೋಗುಗಳನ್ನು ಆಧ್ಯಾತ್ಮಿಕ ಪರಿಭಾಷೆಯಲ್ಲಿ ವರ್ಣಿಸುವುದು ಆದರ್ಶಕಥನ ಅಥವಾ ಭವಿಷ್ಯದ್ದರ್ಶನಕಥನವೆಂದು ಕರೆಯಲ್ಪಡುತ್ತವೆ. ಈ ಮೂರೂ ಬಗೆಯ ಕಥನಗಳು ಎಲ್ಲಾ ಪುರಾಣಗಳಲ್ಲೂ ಕಂಡುಬರುತ್ತವೆ. 2 ಹೀಗಿದ್ದರೂ, ಪುರಾಣಗಳಲ್ಲಿ ಕಥನ ಅಂಶವೇ ಹೆಚ್ಚು ಪ್ರಧಾನವಾದುದು. ಒಂದೊಂದು ಸಾಹಿತ್ಯಕೃತಿಯೂ ಕೂಡ, ಒಂದು ಕಾಲಘಟ್ಟದಲ್ಲಿ 'ಪುರಾಣಕೃತಿಯೂ' ಮತ್ತು 'ಇತಿಹಾಸಕೃತಿಯೂ' ಆಗಿರುತ್ತದೆ. ಉದಾಹರಣೆಗೆ, ಜಿನಸೇನರ 'ಪೂರ್ವಪುರಾಣ'ವು ಕಾಲಘಟ್ಟದ ನೆಲೆಯಿಂದ ಸಾಹಿತ್ಯಕೃತಿಯ ಆಶಯವನ್ನು ಪಡೆದಿದ್ದರೆ; ಅನಂತರದ ಸಂದರ್ಭದಲ್ಲಿ ಅದು ಪುರಾಣಕೃತಿ ಮತ್ತು ಇತಿಹಾಸಕೃತಿಯ ಪ್ರಧಾನಾಂಶವನ್ನು ಪಡೆದುಕೊಂಡು ಮಾನ್ಯವಾಗಿರುತ್ತದೆ. ಇದು ಒಂದು

2 'ಅಷ್ಟಾದಶ ಉಪನಿಷತ್ತು'- ಸಂಪಾದಕರು- ವಿ.ಪಿ. ಲಿಮಯೆ ಮತ್ತು ಆರ್.ಡಿ. ವಾಡೇಕರ್, ಪೂನಾ, 1958

ನೆಲೆಯಲ್ಲಿ ಕೃತಿಯ ಸಾಂಸ್ಕೃತಿಕ ಗ್ರಹಿಕೆಯ ಸ್ವರೂಪವನ್ನು ಮತ್ತು ಕಲಾಕೇಂದ್ರಿತ ದೃಷ್ಟಿಯಲ್ಲಿ ಆದ ಪರಿವರ್ತನೆಯನ್ನು ಸೂಚಿಸುತ್ತದೆ. ಜಿನಸೇನ ಮತ್ತು ಪಂಪರ ಕಾಲದೇಶ ಸಂದರ್ಭಗಳನ್ನು ಗುರುತಿಸಿ ಈ ರೀತಿ ವ್ಯಾಖ್ಯಾನಿಸಬಹುದಾಗಿದೆ. ಇತಿಹಾಸ ಮತ್ತು ಪುರಾಣಕೃತಿಗಳು ಸಾಹಿತ್ಯಕೃತಿಗೆ ಮಾತೆ ಎನಿಸಿವೆ. ಕಾರಣ, ಒಂದು ಇತಿಹಾಸ ಅಥವಾ ಪುರಾಣಕೃತಿಯೊಂದರಿಂದ ಅನೇಕ ಸಾಹಿತ್ಯಕೃತಿಗಳು ಜನ್ಯವಾಗುತ್ತವೆ. ಇದಕ್ಕೆ ಜಿನಸೇನ ಮತ್ತು ಗುಣಭದ್ರರ 'ಮಹಾಪುರಾಣ'ವೇ ಉತ್ತಮ ನಿದರ್ಶನ. ಇದು ಸಂಸ್ಕೃತಭಾಷೆಯಂತೆ ಎಲ್ಲಾ ಭಾರತೀಯ ಭಾಷೆ ಮತ್ತು ಸಾಹಿತ್ಯಕ್ಕೂ ಅನ್ವಯವಾಗುವಂತಹ ವಿಷಯವಾಗಿದೆ. ಒಂದು ರಾಮಾಯಣದಿಂದ ನೂರಾರು ರಾಮಾಯಣಗಳು; ಒಂದು ಮಹಾಭಾರತದಿಂದ ನೂರಾರು ಮಹಾಭಾರತ ಕೃತಿಗಳು ಸ್ಥೂಲಪಠ್ಯದಿಂದ ಸೂಕ್ಷ್ಮಪಠ್ಯಗಳಾಗಿ ಅವತರಣಗೊಳ್ಳುವ ಪ್ರಕ್ರಿಯೆಯನ್ನು ವಿಶೇಷವಾಗಿ ಸಾಹಿತ್ಯ ಅಧ್ಯಯನದಲ್ಲಿ ಅಭ್ಯಸಿಸಬಹುದಾಗಿದೆ. ಪುರಾಣೇತಿಹಾಸ ಮತ್ತು ಸಾಹಿತ್ಯಗಳ ನಡುವಿನ ಅಂತರ್ಸಂಬಧದ ಬಗೆಗಿನ ಪ್ರಕ್ರಿಯೆ, ವ್ಯಾಖ್ಯಾನ ಹಾಗೂ ವಿವರಣೆ-ವಿಶ್ಲೇಷಣೆಗಳ ಸಂಗ್ರಹಣೆ ಮತ್ತು ಸಮನ್ವಯತೆಯು ಕೃತಿಯಿಂದ ಕೃತಿಗೆ; ಕಾಲದಿಂದ ಕಾಲಕ್ಕೆ; ಸಂದರ್ಭದಿಂದ ಸಂದರ್ಭಕ್ಕೆ ದಾಟುತ್ತಾ ಹೋಗುತ್ತದೆ. ಪುರಾಣಗಳ ಅಧ್ಯಯನಕ್ಕೆ ಜಾನಪದ ಸಂಸ್ಕೃತಿ ಮತ್ತು ನಂಬಿಕೆಗಳೂ ಒಂದು ರೀತಿಯ ಸುಂದರ ಚೌಕಟ್ಟನ್ನು ನಿರ್ಮಿಸಿಕೊಟ್ಟಿದ್ದು, ಸಾಹಿತ್ಯಲೋಕಕ್ಕೆ ಅತ್ಯುತ್ತಮ ಕೊಡುಗೆಗೆ ಕಾರಣವಾಗಿದೆ. ಇವತ್ತಿನ ಜನಪದಸಂಸ್ಕೃತಿಯಲ್ಲೂ ಪ್ರಾಚೀನ ಪುರಾಣಕಥೆಗಳ ಪ್ರತಿಬಿಂಬವನ್ನು ಸ್ಪಷ್ಟವಾಗಿ ಗುರುತಿಸಬಹುದೆಂಬ ಅಂಶವನ್ನು ಇತಿಹಾಸಕಾರರಾದ ಲಿವಿಸ್ ಸ್ಪೆನ್ಸ್ ಈ ರೀತಿ ವಿವರಿಸಿದ್ದಾರೆ.-

"Mythology in the study of a primitive or early form of religion while it was living faith".

ಕವಿ ಜನ್ನನು ತನ್ನ 'ಅನಂತನಾಥಪುರಾಣ'ದಲ್ಲಿ ಮುನಿಪ್ರೋಕ್ತಪುರಾಣವು ಪಂಚಾಂಗಗಳಿಂದಲೂ ಕವಿಪ್ರೋಕ್ತಪುರಾಣವು

ಅವುಗಳ ಜೊತೆಗೆ ದೇಶ, ನಗರ, ರಾಜ್ಯೋತ್ಸವಾಖ್ಯಾನ-ಇವು ಮೂರೂ ಅಂಶಗಳು ಸೇರಿವೆ ಎಂದು ವಿವರಿಸಿದ್ದಾನೆ. –

"ಮುನಿಮಾರ್ಗೋಕ್ತಿ ಪುರಾಣಪದ್ಧತಿಗೆ ಲೋಕಾಕಾರಮುಂ
ತೀರ್ಥವರ್ತನಮುಂ ವ್ಯಾಪ್ತ ಚತುರ್ಗತಿ ಸ್ಥಿತಿಗಶುಂ
ಭಾಸ್ವತ್ತಪೋದಾನಕೀರ್ತನಮುಂ ತತ್ಫಲ ಸಿದ್ಧಿಯುಂ
ನೆಗದ್ದಿವ್ಯೆದಂಗಂ ಕವಿಪ್ರೋಕ್ತ ಕಾವ್ಯನಿಬಂಧೋಚಿತಮೆಂಟು
ದೇಶ, ನಗರೀ, ರಾಜ್ಯೋತ್ಸವಾಖ್ಯಾನದಿಂದ"॥ 3

3 ಪಂಪ ಕವಿಯ 'ಆದಿಪುರಾಣ'ದಲ್ಲಿರುವ ಮಾತುಗಳು ಇಲ್ಲಿನ ವರ್ಣನೆಗಳಿಗೆ ತುಲನಾತ್ಮಕವಾಗಿ ಕಂಡುಬರುತ್ತವೆ.

ಭಾರತೀಯ ಪುರಾಣೇತಿಹಾಸಗಳ ಪರಿಕಲ್ಪನೆಯಲ್ಲಿ ಪುರಾಣ ಶಬ್ದದ ಅರ್ಥ ಪುರಾತನವಾದ ಕಥೆಗಳು ಎಂದು 'ಪುರಾಣಂ ಆಖ್ಯಾನಮ್' ಎಂದೂ, 'ಇತಿ ಆಸೀತ್' ಇತಿಹಾಸವೆಂಬುದಾಗಿಯೂ ವಿವರಿಸಲಾಗಿದೆ. ಇಲ್ಲಿ ಪುರಾತನವೆಂಬ ನಿರ್ವಚನವೂ ಉಂಟು. ಭಾರತೀಯ ಸಾಹಿತ್ಯದಲ್ಲಿ ಪುರಾಣಗಳ ಜೊತೆಜೊತೆಗೆ ಇತಿಹಾಸದ ಶಬ್ದವೂ ಹಾಸುಹೊಕ್ಕಾಗಿದೆ. ಭೂತಕಾಲದಲ್ಲಿ ನಡೆದ ಘಟನೆಗಳ ವರ್ಣನೆಗಳು ಇತಿಹಾಸವೆನಿಸಿದರೆ; ಪುರಾಣಗಳ ವಿಷಯ ಇತಿಹಾಸಕ್ಕಿಂತ ಅಧಿಕ ಮತ್ತು ವ್ಯಾಪಕವೂ, ವಿಸ್ತೃತವೂ ಆಗಿರುತ್ತದೆ. ಪುರಾಣಗಳು ಅತ್ಯಂತ ಪ್ರಾಚೀನವಾದ ಸಾಹಿತ್ಯವಾಗಿದ್ದು, ವೇದಗಳಿಂದ ಹಿಡಿದು, ಮಹಾಭಾರತದವರೆಗೂ ಎಲ್ಲಾ ಗ್ರಂಥಗಳಲ್ಲಿಯೂ ಪ್ರಮಾಣ ದೊರೆಯುತ್ತವೆ. ಅಥರ್ವವೇದ, ಶತಪಥಬ್ರಾಹ್ಮಣ, ಬೃಹದಾರಣ್ಯಕ, ಛಾಂದೋಗ್ಯ, ತೈತ್ತಿರೀಯಾರಣ್ಯಕ, ಮಹಾಭಾಷ್ಯ, ಆಶ್ವಲಾಯನ ಗೃಹ್ಯಸೂತ್ರ, ಆಪಸ್ತಂಭ ಧರ್ಮಸೂತ್ರ, ಮನುಸಂಹಿತೆಗಳಲ್ಲಿಯೂ ಪುರಾಣಗಳ ಉಲ್ಲೇಖವುಂಟು. ಪುರಾಣೇತಿಹಾಸ ಕೃತಿಗಳಲ್ಲಿ ಐತಿಹ್ಯದೊಡನೆ ಕಾವ್ಯಾತ್ಮಕವಾದ ಹಲವಾರು ವಿಚಾರಗಳು, ಸಂಗತಿಗಳು ಹಾಸುಹೊಕ್ಕಾಗಿವೆ. 'ವಿಷ್ಣುಪುರಾಣ'ದ ಭಾಷೆ ಲಾಲಿತ್ಯದಿಂದ ಕೂಡಿದ್ದರೆ; 'ಶ್ರೀಮದ್ಭಾಗವತ' ಮಹಾಪುರಾಣದ ಭಾಷೆ ಶ್ರುತಿನಿಷ್ಠವಾಗಿದೆ. ಪುರಾಣಗಳೆಂಬ ಮೂಲಪಥ್ಯದಿಂದ ನಿರ್ಮಿತವಾದ ಸೂಕ್ಷ್ಮ ಪಥ್ಯಗಳು ಕಾವ್ಯ, ಖಂಡಕಾವ್ಯ ಮತ್ತು ಮಹಾಕಾವ್ಯಗಳಾಗಿವೆ. ಕಾಳಿದಾಸನ ರಘುವಂಶಕ್ಕೆ ವಾಲ್ಮೀಕಿ ಮಹರ್ಷಿಗಳ 'ರಾಮಾಯಾಣ', ಕುಮಾರಸಂಭವಕ್ಕೆ ವಾಯು ಮತ್ತು ಸ್ಕಂದಪುರಾಣಗಳು ಪರ್ಯಾಯವಾಗಿ ನೆರವಾಗಿವೆ. ಆದಿಪುರಾಣಕ್ಕೆ ಜಿನಸೇನರ ಪೂರ್ವಪುರಾಣವು ಪರ್ಯಾಯವೆನಿಸಿದಂತೆ ಎನ್ನಬಹುದು. ಜಿನಸಮಯ ದೀಪಕರಾದ ಮಹಾಪುರುಷರ ದಿವ್ಯಚರಿತೆ, ಅವರ ಲೋಕೋದ್ಧಾರಕವಾದ ದಿವ್ಯೋಪದೇಶ, ವಿಶೇಷ ವ್ಯಕ್ತಿತ್ವ, ಲಕ್ಷಣಗಳಿಂದ ಬದ್ಧವಾದ ಕೃತಿಗಳೇ ಜೈನಪುರಾಣಗಳೆನಿಸಿವೆ. ಜನಸಾಮಾನ್ಯರಲ್ಲಿ ಧರ್ಮಶ್ರದ್ಧೆ, ನೀತಿ-ನಿಷ್ಠೆ, ಸದಾಚಾರಗಳು ಬೇರೂರುವಂತೆ ಮಾಡುವುದು ಪುರಾಣಗಳ ಪ್ರಧಾನ ಉದ್ದೇಶ. ಇವುಗಳಿಗೆ ಮಾದರಿಯೇ ವೈದಿಕ ಪುರಾಣಗಳಾಗಿವೆ. ಜೈನರ ಪುರಾಣಪುರುಷರೆಂದರೆ, ತ್ರಿಷಷ್ಠಿಶಲಾಕಾ ಪುರುಷರೇ ಆಗಿದ್ದಾರೆ. ಇವರಲ್ಲಿ ತೀರ್ಥಂಕರರಿಗೆ ಆದ್ಯ ಸ್ಥಾನ; ಚಕ್ರವರ್ತಿಗಳಿಗೆ ಎರಡನೆಯ ಸ್ಥಾನ; ಬಲರಾಮ-ವಾಸುದೇವ-ಪ್ರತಿವಾಸುದೇವರಿಗೆ ಮೂರನೆಯ ಸ್ಥಾನವನ್ನು ಅನುಕ್ರಮವಾಗಿ ಕೊಡಲಾಗಿದೆ. ಭಾಗವತಪುರಾಣದಲ್ಲಿ ಮಹಾಪುರಾಣದ ಲಕ್ಷಣವನ್ನು ಈ ರೀತಿ ವರ್ಣಿಸಲಾಗಿದೆ.-

"ಸರ್ಗೋಸ್ಯಾಥ ವಿಸರ್ಗಶ್ಚ ವೃತ್ತೀ ರಕ್ಷಾಂತರಾಣಿ ಚ ।
ವಂಶೋ ವಂಶಾನುಚರಿತಂ ಸಂಸ್ಥಾ ಹೇತುರುಪಾಶ್ರಯಃ"॥
"ದಶಭಿರ್ಲಕ್ಷಣೈರ್ಯುಕ್ತಂ ಪುರಾಣಂ ತದ್ವಿದೋ ವಿದುಃ ।
ಕೇಚಿತ್ ಪಂಚವಿಧಂ ಬ್ರಹ್ಮನ್ ಮಹದಲ್ಪ ವ್ಯವಸ್ಥಯಾ"॥

'ಮತ್ಸ್ಯಪುರಾಣ'ದಲ್ಲಿಯೂ ಪುರಾಣದ ಲಕ್ಷಣವನ್ನು ಈ ರೀತಿ ವರ್ಣಿಸಲಾಗಿದೆ. –

"ಬ್ರಹ್ಮವಿಷ್ಣ್ವರ್ಕರುದ್ರಾಣಾಂ ಮಹಾತ್ಮ್ಯಂ ಭುವನಸ್ಯ ಚ ।
ಸಸಂಹಾರ ಪ್ರದಾನಂ ಚ ಪುರಾಣೇ ಪಂಚವರ್ಣಕೇ ।

ಧರ್ಮಶ್ಚಾರ್ಥಶ್ಚ ಕಾಮಶ್ಚ ಮೋಕ್ಷಶ್ಚೈವಾತ್ರ ಕೀರ್ತ್ಯತೇ"॥ 4

ವೈದಿಕ ಪುರಾಣಗಳಲ್ಲಿ 'ಭಾಗವತಪುರಾಣ'ಕ್ಕೆ ಹೆಚ್ಚಿನ ಆದ್ಯತೆ ಉಂಟು. ಭಾರತೀಯ ಧರ್ಮವಿಕಾಸದಲ್ಲಿ ಭಾಗವತಪುರಾಣದ ವ್ಯಾಪಕವಾದ ಪ್ರಭಾವವುಂಟು. ಸಂಸ್ಕೃತ ಸಾಹಿತ್ಯದ ಮುಖ್ಯಕವಿಗಳ ಕಾವ್ಯಗಳ ಮೇಲೆ ಪ್ರಭಾವ-ಪ್ರೇರಣೆ ಬೀರಿದೆ. ಸಾಹಿತ್ಯ ಕೃತಿಯು ರಕ್ತ-ಮಾಂಸಗಳನ್ನು ಪಡೆಯುವುದೇ ಇತಿಹಾಸ-ಪುರಾಣಗಳ ನೆಲೆಯಿಂದ ಎಂಬುದು ಸರ್ವವಿದಿತ. ಭಾರತೀಯ ಪುರಾಣಸಾಹಿತ್ಯದ ಸಂದರ್ಭ ಮತ್ತೊಂದು ವಿಶೇಷವಾದ ಸಂಗತಿಯೆಂದರೆ ವೈಷ್ಣವ ಪುರಾಣಗಳಂತೆ, ಶೈವಪುರಾಣಗಳೂ ಪ್ರಸಿದ್ಧವಾಗಿವೆ. ಶೈವಪುರಾಣಗಳಲ್ಲಿ 'ಮಾರ್ಕಂಡೇಯಪುರಾಣ', 'ಶಿವಪುರಾಣ', 'ಲಿಂಗಪುರಾಣ' ಮತ್ತು 'ಸ್ಕಾಂದಪುರಾಣ' ಹಾಗೂ ಉಪಪುರಾಣಗಳಲ್ಲಿ 'ಶಿವಧರ್ಮಪುರಾಣ', 'ಮಾಹೇಶ್ವರಪುರಾಣ' ಮತ್ತು 'ಸಾಂಬಪುರಾಣ'ಗಳು ಶೈವ ಚಿಂತನೆಯ ಪ್ರಧಾನವಾದ ಧಾರೆಗಳನ್ನು ಅಭ್ಯಸಿಸಲು ಸಹಾಯಕವಾಗಿವೆ. ಇವುಗಳ ಮುಖ್ಯ ಸಾರಾಂಶಗಳು ಖಂಡಕಾವ್ಯ ಮತ್ತು ಮಹಾಕಾವ್ಯಗಳಲ್ಲಿ ಹಾಸುಹೊಕ್ಕಾಗಿ ನಿಂತಿವೆ. ಇವುಗಳ ವಿಶೇಷ ಆಕೃತಿಗಳು ಸಹಸ್ರಾರು ಸ್ತೋತ್ರಕಾವ್ಯಗಳಲ್ಲಿ ನೆಲೆ ನಿಂತಿವೆ. ಪುರಾಣೇತಿಹಾಸಗಳ ಕಥನಜಗತ್ತು 'ನಾದರೂಪಕ'ದಲ್ಲಿ ಮೇಳೈಸಿವೆ. ಆದಿಶಂಕರಾಚಾರ್ಯರ 'ಶಿವಮಹಿಮ್ನಃಸ್ತೋತ್ರ', 'ಶಿವಾನಂದಲಹರೀ', 'ದಕ್ಷಿಣಾಮೂರ್ತಿಸ್ತೋತ್ರ'ಗಳು ಶಿವಪರ ಹಾಗೂ ತಂತ್ರಪರ ಸ್ತೋತ್ರಗಳು; ಹಾಗೂ ಅಭಿನವಗುಪ್ತರ ಹತ್ತಾರು ಶೈವಸ್ತೋತ್ರಗಳು ಈ ನಿಟ್ಟಿನಲ್ಲಿ ಅತ್ಯುತ್ತಮ ಉದಾಹರಣೆಗಳು ಮತ್ತು ಆದರ್ಶಮಯ ಕೃತಿಗಳೆನಿಸಿವೆ. ಇಂತಹ ಸ್ತೋತ್ರಕಾವ್ಯಗಳು ಭಕ್ತಿ ಪರಂಪರೆಯ ನೆಲೆಯಲ್ಲಿ ವಿಶಿಷ್ಟರಚನೆ ಎನಿಸಿವೆ. ಆದಿಶಂಕರಾಚಾರ್ಯರು, ಕಾಳಿದಾಸ, ರತ್ನಾಕರ, ಅಭಿನವಗುಪ್ತ, ಜಗದ್ಧರರೇ ಮೊದಲಾದ ಪ್ರಮುಖರು ಮಂಡಿಸಿದ ಶೈವಚಿಂತನೆ ಮತ್ತು ಸಾಹಿತ್ಯ ಚಿಂತನೆಗಳ ಮಾರ್ಗಗಳನ್ನು, ಪುರಾಣೇತಿಹಾಸಲೋಕದಿಂದ ಸ್ವೀಕರಿಸಿ, ವಿನ್ಯಾಸಗಳ ಹಾಗೂ ಮಂಡಿತವಾದ ಕ್ರಮಗಳ ಮೇಲೆ ಮೂಡಿಸಿದ ವಿಶೇಷ ಪ್ರಭಾವ, ಪ್ರೇರಣೆ ಮತ್ತು ನೂತನ ದಿಶೆ

4 ಪುರಾಣಗಳ ಪ್ರಮುಖ ಹತ್ತು ಲಕ್ಷಣಗಳಲ್ಲಿ ಬ್ರಹ್ಮ, ವಿಷ್ಣು, ಸೂರ್ಯ, ರುದ್ರಾದಿ ದೇವತೆಗಳ ಮಹಿಮಾನುವರ್ಣನೆ, ಪ್ರಪಂಚದ ಸ್ಥಿತಿ-ಲಯಗಳ ವರ್ಣನೆ, ಧರ್ಮಾರ್ಥಕಾಮಮೋಕ್ಷಗಳ ಕೀರ್ತನೆ ಪುರಾಣಗಳಲ್ಲಿರಬೇಕು ಎಂದರ್ಥ. ಎನ್ನಬಹುದಾಗಿದೆ. ಈ ಚಿಂತನೆಗಳಿಂದ ತೌಲನಿಕ ಅಧ್ಯಯನಕ್ಕೂ, ಅಂತರ್ಶಿಸ್ತೀಯ ಅಧ್ಯಯನಗಳಿಗೂ ಮಾರ್ಗದರ್ಶಕವಾಗಿವೆ.

ವೀರಶೈವಪುರಾಣಗಳಲ್ಲಿ ಪುರಾಣಗಳ ಲಕ್ಷಣಗಳನ್ನೊಳಗೊಂಡಿರುವ ಕೃತಿಗಳು ಕಡಿಮೆ ಸಂಖ್ಯೆಯಲ್ಲಿದ್ದು ಅವುಗಳಲ್ಲಿ – 'ಬಸವಪುರಾಣ', 'ಚೆನ್ನಬಸವಪುರಾಣ', ' ಚತುರ್ರಾಯರ ಪುರಾಣ', 'ಸಿದ್ಧೇಶ್ವರಪುರಾಣ', 'ಪ್ರಭುದೇವರ ಪುರಾಣ', 'ಶಂಕರ ದಾಸಿಮಯ್ಯನ ಪುರಾಣ'ಗಳು ಪ್ರಸಿದ್ಧವಾಗಿವೆ. 'ಶಿವತತ್ತ್ವಚಿಂತಾಮಣಿ' ಮತ್ತು 'ವೀರಶೈವಾಮೃತ ಮಹಾಪುರಾಣಗಳಲ್ಲಿ' ಬಹುಮಟ್ಟಿಗೆ ಪುರಾಣಗಳ ಎಲ್ಲಾ ಲಕ್ಷಣಗಳೂ ಸಮನ್ವಿತಗೊಂಡಿವೆ.

ಕಾಶ್ಮೀರದ ತ್ರಿದರ್ಶನದ ಆಚಾರ್ಯರಲ್ಲೊಬ್ಬರಾದ ಉತ್ಪಲದೇವನ ಸ್ತೋತ್ರವೊಂದರಲ್ಲಿ ಪುರಾಣಗಳ ಆಕೃತಿ ಮತ್ತು ಆಶಯದ ವಿವಿಧ ನೆಲೆಗಳನ್ನು ತಿಳಿಯಬಹುದು. ಇದೂ ಒಂದು ರೀತಿಯ ಸಂಸ್ಕೃತಿಯು ನಿಯೋಜಿಸಲ್ಪಡುವ ಪಲ್ಲಟವ್ಯಾಪಾರಗಳ ಮುಕ್ತನೆಲೆಗಳಲ್ಲಿ ಒಂದಾಗಿದೆ ಎಂದು ತಿಳಿಯಬಹುದು.-

"ಕಂಠಕೋಣ ವಿನಷ್ಯಮೀಶತೇ ಕಾಲಕೂಟಮಪಿ ಮೇ ಮಹಾಮೃತಮ್ ।

ಅಪ್ಯುಪಾತ್ತಮಮೃತ ಭವದ್ವಪುಃ ಭೇದವೃತ್ತಿ ಯದಿ ಮೇ ನ ರೋಚತೇ"॥ 5

ಇಲ್ಲಿ ಶಿವನ ಸಂಪರ್ಕ್ಕೆ ಬಂದ ಸಣ್ಣ ಸಣ್ಣ ವಸ್ತುವೂ ಕವಿಗೆ ಅತ್ಯಂತ ಪ್ರಿಯವಾದುದು. ಈ ಭಾವನೆ ಶ್ಲೋಕದಲ್ಲಿ ಸ್ಪಷ್ಟವಾಗಿ ವ್ಯಕ್ತವಾಗಿದೆ.- "ನಿನ್ನ ಕೊರಳಿನಲ್ಲಿರುವ ಕಾಲಕೂಟ ವಿಷವು ನನಗೆ ಅಮೃತಕ್ಕೆ ಸಮಾನ ಮತ್ತು ಪೋಷಕವಾದುದು. ಅದು ನನಗೆ ಸಂಜೀವಿನೀ ಕೂಡ ಹೌದು. ಆದರೆ, ನಿನ್ನ ಶರೀರದಿಂದ ಬೇರೆಯಾದ ಅಮೃತವೂ ಸಹ ನನಗೆ ರುಚಿಸುವುದಿಲ್ಲ" ಎಂದರ್ಥ.

***ಪುರಾಣೇತಿಹಾಸ ಮತ್ತು ಚಂಪೂ ಕಾವ್ಯಶೈಲಿ:-**

ಪುರಾಣೇತಿಹಾಸಗಳನ್ನಾಧರಿಸಿದ ಅನೇಕಾನೇಕ ಚಂಪೂ ಕಾವ್ಯಗಳು ಭಾರತೀಯ ಸಾಹಿತ್ಯದಲ್ಲಿ ಉತ್ಕೃಷ್ಟ ಪ್ರಮಾಣದಲ್ಲಿ ಮೇಲೈಸಿವೆ. ಅದರಲ್ಲೂ ಕನ್ನಡ ಮತ್ತು ಸಂಸ್ಕೃತಭಾಷೆಗಳ ಕೊಡುಗೆ ಈ ನಿಟ್ಟಿನಲ್ಲಿ ಪ್ರಥಮಸ್ಥಾನದಲ್ಲಿವೆ ಎಂದರೂ ತಪ್ಪಾಗದು.

"ಗದ್ಯಾವಲೀ ಪದ್ಯಪರಂಪರಾ ಚ ಪ್ರತ್ಯೇಕಮುತ್ಪಾದಯತಿ ಪ್ರಮೋದಮ್।

ಹರ್ಷಪ್ರಕರ್ಷಂ ತನುತೇ ಮಿಲಿತ್ವಾ ಪ್ರಾಕ್ ಬಾಲ್ಯತಾರುಣ್ಯವತೀವಕನ್ಯಾ"॥ (ಜೀವಂಧರಚಂಪೂ-1.9) 6

5 'ಶಿವಸ್ತೋತ್ರಾವಳೀ'- ಚೌಖಾಂಬಾ ಸಂಸ್ಕೃತಿ ಗ್ರಂಥಮಾಲಾ, ಕಾಶೀ, 1959

"ಗದ್ಯಾನುಬನ್ಧರಸಮಿಶ್ರಿತಪದ್ಯಸೂಕ್ತಿಃ । ಹೃದ್ಯಾ ಹಿ ವಾದ್ಯಕಲಯಾ ಕಲಿತೇವ ಗೀತಿಃ"। (ಚಂಪೂರಾಮಾಯಣಮ್-1.2)

ಕೇವಲ ಪದ್ಯ ಅಥವಾ ಗದ್ಯಕ್ಕಿಂತ ಉಭಯಮಿಶ್ರಣವು ಹೆಚ್ಚು ಆಕರ್ಷಕವೆಂಬ ಭಾವನೆ ಚಂಪೂರಚನೆಗೆ ಪ್ರೇರಕವಾಗಿರಬೇಕು. ಗದ್ಯಸಹಿತವಾದ ಪದ್ಯವು ವೀಣಾದಿವಾದ್ಯ ಸಹಿತವಾದ ಸಂಗೀತವಿದ್ದಂತೆ ಎಂಬುದು ಕವಿ ವೇಂಕಟಾಧ್ವರಿಯ ಅಭಿಪ್ರಾಯ.

"ಆದತ್ತೇ ಹಿ ತಯೋಃ ಪ್ರಯೋಗ-ಉಭಯೋರಾಮೋದಭೂಮೋದಯಮ್ ।

ಸಂಗಃ ಕಸ್ಯ ಹಿ ಸ್ವದೇತ ಮನಸೇ ಮಾಧ್ವೀಕಮೃದ್ವೀಕಯೋಃ" ॥ (ವಿಶ್ವಗುಣಾದರ್ಶನಚಂಪೂ)

ಚಂಪೂ ಶೈಲಿಯ ಕೃತಿಗಳು ಇಪ್ಪತ್ತನೇಯ ಶತಮಾನದಲ್ಲೂ ಸಹ ಹೆಚ್ಚು ಹೆಚ್ಚು ಪ್ರಚುರವಾಗಿ ಪ್ರಚಲಿತವಾಗಿದ್ದು, ಸಂಸ್ಕೃತ ಮತ್ತು ಕನ್ನಡಭಾಷೆಯೇ ಮೊದಲಾದ ಸಾಹಿತ್ಯಲೋಕದಲ್ಲಿ ಕಾವ್ಯ ಸೃಷ್ಟಿಯು ನಿಂತ ನೀರಲ್ಲವೆಂಬುದನ್ನು ಸಮರ್ಥಿಸುತ್ತವೆ. ಇತಿಹಾಸ ಮತ್ತು ಪುರಾಣಕಥೆಗಳ ಮಹತ್ತ್ವವನ್ನು ಪ್ರತಿಬಿಂಬಿಸುವ ಪ್ರಸಿದ್ಧ ಚಂಪೂಕೃತಿಗಳೆಂದರೆ,- ಅ ತ್ರಿವಿಕ್ರಮ ಭಟ್ಟನ 'ನಳಚಂಪೂ' ಅಥವಾ 'ದಮಯಂತೀಚಂಪೂ' 7 ಮತ್ತು 'ಮದಾಲಸಚಂಪೂ', ಜೈನತತ್ತ್ವಗಳನ್ನೊಳಗೊಂಡ ಸೋಮದೇವಸೂರಿಯ 'ಯಶಸ್ತಿಲಕಚಂಪೂ', ಹರಿಚಂದ್ರನ 'ಜೀವಂಧರಚಂಪೂ', ಇತಿಹಾಸ ಮತ್ತು ಪುರಾಣಪ್ರಸಿದ್ಧವಾದ ವಿದರ್ಭರಾಜನಾದ ಭೋಜರಾಜನ 'ಚಂಪೂರಾಮಾಯಣಮ್' 8 , ಸೋಡ್ಢಲನ 'ಉದಯಸುಂದರೀ ಕಥಾ', ಅಭಿನವ ಕಾಳಿದಾಸನ 'ಭಾಗವತಚಂಪೂ', ಅನಂತಭಟ್ಟನ 'ಚಂಪೂಭಾರತಮ್', ಅರ್ಹದಾಸನ 'ಪುರದೇವ ಚಂಪೂ', ಅಹೋಬಲಸೂರಿಯ 'ವಿರೂಪಾಕ್ಷವಸಂತೋತ್ಸವಚಂಪೂ' 9 , ಸೋಮನಾಥನ 'ವ್ಯಾಸಯೋಗಿಚರಿತಮ್', ಪರಮಾನಂದದಾಸನ 'ಆನಂದವೃಂದಾವನಚಂಪೂ', ಜೀವಗೋಸ್ವಾಮಿಯ 'ಗೋಪಾಲಚಂಪೂ', ತಿರುಮಲಾಂಬೆಯ 'ವರದಾಂಬಿಕಾಪರಿಣಯಚಂಪೂ' 10 , ರಾಮಾನುಜಾಚಾರ್ಯರ 'ಶ್ರೀರಾಮಾನುಜಚಂಪೂ', ಶೇಷಕೃಷ್ಣರ 'ಪಾರಿಜಾತ ಹರಣಚಂಪೂ', ಸಮರಪುಂಗವದೀಕ್ಷಿತರ 'ತೀರ್ಥಯಾತ್ರಾಪ್ರಬಂಧಚಂಪೂ', ಸೂರ್ಯಕವಿಯ 'ನೃಸಿಂಹಚಂಪೂ', ನಾರಾಯಣಭಟ್ಟತಿರಿ(ಭಟ್ಟಪಾದ)ಯ 'ಮತ್ಸ್ಯಾವತಾರಪ್ರಬಂಧ',

6 ಹರಿಚಂದ್ರ-ಕ್ರಿ.ಶ.10 ನೇ ಶತಮಾನ

7 ನಳೋಪಾಖ್ಯಾನಮ್ ಆಧಾರಿತ ಪ್ರಸಿದ್ಧ ಚಂಪೂಕೃತಿ

8 ಪಂಚಮಹಾ ಚಂಪೂಕಾವ್ಯಗಳಲ್ಲಿ ಪ್ರಮುಖವಾದುದು.

9 ವಸಂತ ನವರಾತ್ರಿಯಲ್ಲಿ ನಡೆಯುವ ವಿರೂಪಾಕ್ಷ ದೇವರ ರಥೋತ್ಸವ, ಪಂಪಾಂಬಿಕಾ ವಿವಾಹ, ವಿದ್ಯಾರಣ್ಯ ಗುರುಗಳು, ಹರಿಹರ, ವಿದ್ಯಾನಗರ, ಕಮಲಾಪುರ, ಪಂಪಾ, ತುಂಗಭದ್ರಾ ಮೊದಲಾದ ಪ್ರಸಿದ್ಧ ಸ್ಥಳವಿಶೇಷಗಳ ವರ್ಣನೆಗಳುಂಟು.

10 ಕರ್ಣಾಟಕದ ಸುಪ್ರಸಿದ್ಧ ಕವಯಿತ್ರೀ, ವಿಜಯನಗರ ಸಾಮ್ರಾಜ್ಯದ ರಾಜಾ ಅಚ್ಯುತರಾಯನ ರಾಣಿ (ಚಾರಿತ್ರಿಕ ವಿಷಯವನ್ನೊಳಗೊಂಡ ಕೃತಿ)

ಮಿತ್ರಮಿಶ್ರರ 'ಆನಂದಕಂದಚಂಪೂ', ನೀಲಕಂಠದೀಕ್ಷಿತರ 'ನೀಲಕಂಠವಿಜಯಚಂಪೂ', ವೇಂಕಟಾಧ್ವರಿಯ 'ವಿಶ್ವಗುಣಾ.

ದರ್ಶಚಂಪೂ' 11 ಮತ್ತು 'ವರದಾಭ್ಯುದಯ ಅಥವಾ ಹಸ್ತಗಿರಿಚಂಪೂ', ವೇಂಕಟೇಪ್ಪಕವಿಯ 'ಶ್ರೀನಿವಾಸಚಂಪೂ' ಮತ್ತು 'ಉತ್ತರಚಂಪೂ', ಚಕ್ರಕವಿಯ 'ದ್ರೌಪದೀಪರಿಣಯಚಂಪೂ', ವಿರೂಪಾಕ್ಷಕವಿಯ 'ಚೋಲಚಂಪೂ' ಮತ್ತು 'ಕಾರ್ತವೀರ್ಯವಿಜಯಚಂಪೂ', ಅಶ್ವಿನರಾಮವರ್ಮನ 'ಸಂತಾನಗೋಪಾಲಚಂಪೂ', ಶ್ರೀನಿವಾಸಕವಿಯ 'ಆನಂದರಂಗ ಚಂಪೂ', ಅಚ್ಯುತಶರ್ಮಾರ 'ಭಾಗೀರಥೀಚಂಪೂ' ಇತ್ಯಾದಿ.

ಹೀಗೆ ನೂರಾರು ಚಂಪೂ ಕಾವ್ಯಗಳು ಸಮಸ್ತ ಭಾರತೀಯ ಜ್ಞಾನಪರಂಪರೆ, ಇತಿಹಾಸ, ಪುರಾಣ, ಸಮಗ್ರ ಪರಂಪರೆ, ಸಂಸ್ಕೃತಿ-ಸಾಹಿತ್ಯ, ಸಂಪ್ರದಾಯ, ಪದ್ಧತಿ, ಆಚಾರ-ವಿಚಾರ, ಮನೋಭಾವ, ಮಾನವೀಯ ಮೌಲ್ಯಗಳು, ಪ್ರಕೃತಿಪ್ರೇಮ, ಜೀವವೈವಿಧ್ಯತೆ, ಜೀವನವಿಧಾನಗಳನ್ನು ಎಡಬಿಡದೆ ಓತಪ್ರೋತವಾಗಿ, ನಿರಂತರವಾಗಿ ನಮಗೆಲ್ಲಾ ಅನಂತವಾದ ವಿಶ್ವರೂಪ ಸದೃಶವಾದಿ ವಿಶೇಷ ದರ್ಶನವನ್ನೂ, ಜ್ಞಾನ-ವಿಜ್ಞಾನಸುಧೆಯನ್ನು ಹರಿಸುತ್ತಾ ಬಂದಿವೆ. ಇದರೊಂದಿಗೆ ಇಂತಹ ಮಹನೀಯ ಕಾವ್ಯಪರಂಪರೆಯು ಸಾಹಿತ್ಯಾಕಾಶದಲ್ಲಿ ಭಾರತೀಯ ಪುರಾಣೇತಿಹಾಸಗಳ ಅನ್ಯೋನ್ಯ ಸಂಬಂಧವನ್ನು ಸರ್ವದಾ ಅಜರಾಮರವಾಗಿಸಿವೆ.

***ಉಪಸಂಹಾರ:-**

ಪುರಾಣಸಾಹಿತ್ಯವು ಭಾರತೀಯ ಅಭಿಜಾತ ಸಾಹಿತ್ಯದ ಸಂದರ್ಭಗಳಲ್ಲಿ ನಡೆದಿಹ ವಿಶೇಷ ಅಂತರ್ಪ್ರಕ್ರಿಯೆ, ಪುರಾಣೇತಿಹಾಸದಲ್ಲಿ ಬರುವ ವಸ್ತು, ಪಾತ್ರ, ರೂಪಕ, ಶೈಲಿ, ನೀತಿಪ್ರಜ್ಞೆ ಮತ್ತು ಪ್ರತೀಕಗಳು ಸಾಹಿತ್ಯದಲ್ಲಿ ಹೆಚ್ಚು ಚರ್ಚೆಗೆ ಒಳಪಟ್ಟಿವೆ. ಹೀಗೆ, ಸಾಹಿತ್ಯಕೃತಿಯ ಆಕೃತಿ ಮತ್ತು ಆಶಯಗಳು ಹಿಂದೆ ಮೂಲಪಠ್ಯವೊಂದು ನಿರಂತರವಾಗಿ ಕೆಲಸ ಮಾಡುತ್ತಿರುತ್ತದೆ. ಸಾಹಿತ್ಯಕೃತಿಯು ತನ್ನ ನಿರ್ಮಾಣಹಂತದಲ್ಲಿ ಅನೇಕ ಕಡೆಗಳಿಂದ ತನಗೆ ಬೇಕಾದ ವಸ್ತುನಿರ್ಮಾಣದ ಸಂಗತಿಗಳನ್ನು ನಿರಂತರವಾಗಿ ತೆಗೆದುಕೊಳ್ಳುತ್ತಿರುತ್ತದೆ. ಸಾಹಿತ್ಯ ಸಂದರ್ಭವೊಂದು ಕಾಲ-ದೇಶಗಳ ನಡುವಣ ಅವಧಿಯಲ್ಲಿ ಸಂಸ್ಕೃತಿಯ ಸಂರಚನೆ ಮಾಡಿಯೇ ಮಾಡುತ್ತದೆ. ಇದರಿಂದ ಕಾಲ-ದೇಶಗಳ ಸ್ವರೂಪವನ್ನು ತಿಳಿಯಲು ಸಾಧ್ಯವಾಗುತ್ತದೆ.

ಹೀಗೆ, ಪುರಾಣಗಳು ಅತ್ಯಂತ ಪ್ರಾಚೀನ ಹಾಗೂ ವಿಶಾಲವಾದ ಸಾಹಿತ್ಯವಾಗಿದ್ದು, ಇವಕ್ಕೆ ವೇದಗಳಿಂದ ಹಿಡಿದು, ಮಹಾಭಾರತದವರೆಗೆ ಎಲ್ಲಾ ಗ್ರಂಥಗಳಲ್ಲಿಯೂ ಪ್ರಮಾಣ ದೊರೆಯುತ್ತವೆ.

11 ಜಗತ್ತಿನಲ್ಲಿನ ಗುಣದೋಷಗಳನ್ನು ವಿವರಿಸುವ ವಿಶೇಷ ಕೃತಿ.

ಅಥರ್ವವೇದ, ಶತಪಥಬ್ರಾಹ್ಮಣ, ಬೃಹದಾರಣ್ಯಕೋಪನಿಷತ್ತು, ಛಾಂದೋಗ್ಯೋಪನಿಷತ್ತು, ತೈತ್ತರೀಯೋಪನಿಷತ್ತು, ಮಹಾಭಾಷ್ಯ, ಆಶ್ವಲಾಯನ ಗೃಹ್ಯಸೂತ್ರ, ಆಪಸ್ತಂಭ ಧರ್ಮಾಸೂತ್ರ, ಮನುಸಂಹಿತೆಗಳಲ್ಲಿಯೂ ಪುರಾಣಗಳ ಉಲ್ಲೇಖವುಂಟು. ಉದಾಹರಣೆಗೆ:-

"ಋಚಃ ಸಾಮಾನಿ ಛಂದಾಂಸಿ ಪುರಾಣಂ ಯಜುಷಾ ಸಹ ।

ಉಚ್ಛಿಷ್ಟಾಜ್ಜಜ್ಞಿರೇ ಸರ್ವೇ ದಿವಿ ದೇವಾ ದಿವಿಶ್ರಿತಾಃ"॥ (ಅಥರ್ವವೇದ)

ಒಟ್ಟಿನಲ್ಲಿ "ಲೋಕಾಃ ಸಮಸ್ತಾಃ ಸುಖಿನೋ ಭವಂತು" ಎಂಬ ಉತ್ತುಂಗವಾದ ಸಾರ್ವತ್ರಿಕ ಮೌಲ್ಯಗಳೊಂದಿಗೆ ಪುರಾಣೇತಿಹಾಸಗಳು ಅನಂತವಾದ ಭಾರತೀಯ ಜೀವನಾದರ್ಶಗಳನ್ನು ಎಡಬಿಡದೆ ನಮಗೆ ಸ್ಪಷ್ಟಪಡಿಸುವ ಮಹಾನ್ ದಾರಿದೀಪವಾಗಿ ಪ್ರಸಿದ್ಧವಾಗಿವೆ. ವಿಶ್ವಮಾನವ ಪರಿಕಲ್ಪನೆಯೊಂದಿಗೆ ಸರ್ವಾಂಗೀಣ ಉನ್ನತಿ ಮತ್ತು ಪ್ರಗತಿ, ಜೀವನ ನೀತಿ, ಪ್ರೀತಿ, ರೀತಿಗಳು ಇತ್ಯಾದಿ ಪುರಾಣೇತಿಹಾಸ ಕೃತಿಗಳ ರಚನೆಯ ಸಮಗ್ರ ಧ್ಯೇಯೋದ್ದೇಶವಾಗಿದೆ. ಪುರಾಣೇ-ತಿಹಾಸವು ವಿಶಿಷ್ಟ ನೆಲೆಯಲ್ಲಿ ಮಾತ್ರವೇ ತನ್ನ ಅಸ್ತಿತ್ವವನ್ನು ರೂಢಿಸಿಕೊಂಡಿರುವುದಲ್ಲದೇ, ಜನಪದ ಪುರಾಣಗಳಲ್ಲಿ, ಸಂಸ್ಕೃತಿಯಲ್ಲಿ, ಆಚರಣೆಗಳಲ್ಲಿ, ಯಕ್ಷಗಾನ-ಬಯಲಾಟಗಳಲ್ಲೂ ಹಲವಾರು ಮಜಲುಗಳನ್ನು ವ್ಯಕ್ತಪಡಿಸುತ್ತದೆ. ಲೋಕದೊಳಗಿನ ಬದುಕಿನ ವಿದ್ಯಮಾನಗಳನ್ನು, ಬಾಳ್ವೆಯ ದ್ವಂದ್ವಗಳನ್ನು ಹುಡಿಕಿ ತಿಳಿಯಲು, ಪ್ರಾಚೀನ, ಮಧ್ಯಕಾಲೀನ

ಹಾಗೂ ಆಧುನಿಕ ಸಾಹಿತ್ಯ ಪ್ರಪಂಚದ ವಿವಿಧ ಸ್ತರಗಳನ್ನು ತಿಳಿಸುವ ಅಪೂರ್ವ ರಚನೆಯಾಗಿದೆ. ಇಂತಹ ಸಾಹಿತ್ಯದ ಮೂಲಕ ನಾವು "ವಸುಧೈವ ಕುಟುಂಬಕಮ್" ಪರಿಕಲ್ಪನೆಯನ್ನು ಸಾಕಾರಗೊಳಿಸಬಹುದಾಗಿದೆ. ಸಾಹಿತ್ಯ ಮತ್ತು ಪುರಾಣೇತಿಹಾಸಗಳ ನಡುವಿನ ವಿಶಿಷ್ಟ ಸಂಬಂಧವನ್ನು ಕುರಿತು ಪಾಶ್ಚಿಮಾತ್ಯ ಸಾಹಿತ್ಯಲೋಕದಲ್ಲೂ ಭಿನ್ನ ರೀತಿಯ ಚರ್ಚೆಗಳು ಮತ್ತು ಅಧ್ಯಯನಗಳು ನಿರಂತರವಾಗಿ ಸಾಗಿವೆ.

*****

*ಪರಾಮರ್ಶನ ಗ್ರಂಥಗಳು*

1.'ಸಾಹಿತ್ಯ ಮತ್ತು ಪುರಾಣ' ಸಹಸಂಬಂಧಗಳ ಅಧ್ಯಯನ– ಪ್ರೊ.ಮಲ್ಲೇಪುರಂ ಜಿ. ವೆಂಕಟೇಶ, ಉದಯ ಪ್ರಕಾಶನ, ರಾಜಾಜಿನಗರ, ಬೆಂಗಳೂರು–560010, ತೃತೀಯ ಮುದ್ರಣ–2019, ISBN: 978–81–930079–7–6

2. ಸಂಸ್ಕೃತ ಸಾಹಿತ್ಯ ಮತ್ತು ಇತಿಹಾಸ– ಆಚಾರ್ಯ ಬಲದೇವ ಉಪಾಧ್ಯಾಯ (ಮೂಲ ಲೇಖಕರು), ವಿದ್ವಾನ್. ಎಸ್. ರಾಮಚಂದ್ರಶಾಸ್ತ್ರೀ (ಅನುವಾದಕರು), ಪ್ರಸಾರಾಂಗ, ಬೆಂಗಳೂರು ವಿಶ್ವವಿದ್ಯಾಲಯ, ಎರಡನೇ ಮುದ್ರಣ–2003

3. 'ತತ್ತ್ವಕಥನ'– ಪ್ರೊ.ಮಲ್ಲೇಪುರಂ ಜಿ. ವೆಂಕಟೇಶ, ಅನುಪಮ ಪ್ರಕಾಶನ, ಅಥಣಿ, ಮುದ್ರಣ 2022

*******************************

ISSN 2250-1711
Journal of Veda Samskrita Academy
A National Peer-Reviewed Research Journal
Volume : XXVI, July to December-2025

# वासाधिकारे दशावतारकल्पनम्

**कुमारी लिङ्गारेड्डि उमामहेश्वरी**
शोधच्छात्री आगमविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपतिः, आं.प्र.
Cell: 91820 75761

**वेदानां व्यसनादर्वाक् प्राग्रूपं मिलितन्तु यत् । तां तु वैखानसीं शाखमिति वेदविदो विदुः ॥**

सर्वैः ज्ञायते यत् अपौरुषोयो हि वेदः परमात्मनः उच्छ्वासनिःश्वासरूप इति । असौ समस्तानां शास्त्राणां तत्त्वानां धर्माणां च आधारभूत एव भवेत् । वस्तुवैशद्यात् अयं महर्षिणा व्यासेन विभागः कृतः ऋक्-यजुः साम-आथर्वणरूपेण । विभागात् पूर्वं वेदराशेः नाम वैखानसी शाखा इति प्रसिद्धिः जाता[1]।

वैखानसस्य औखेय इति नामान्तरमप्यस्ति। सर्वसमर्चनासिद्धान्तस्य प्राग्रूपमिदं भवतीति वक्तुं नैव संशीतिः। संसारसागरे मज्जानोन्मज्जनान् तापत्रयदुःखानुभूयमानान् समुद्धर्तुं श्रीमन्नारायणद्वारा उपिदष्टं यत् वैदिकमार्गसमाराधनम् अस्ति तदेव वेदवीथीसदृशं अखिलानां प्रमाणानां सार्वभौमसदृशं अद्वितीयं मार्ग च भवतीति नास्ति संसीतिलेशः।

**यद्वेदमन्त्रैः क्रियते तत् वैखानसमीरितम् । तस्माद्वैखानसं श्रेष्ठमिति पूर्वजदर्शनम्[2] ॥**

वैखानसवाङ्मये प्रप्रथमः आचार्यः गुरुश्रेष्ठः श्रीविखनोमुनिः। अस्य मुनेः शिष्याः तावत् भृगु-मरीचि-अत्रि-कश्यपाः महर्षयः चत्वारः विद्यन्ते । एतेषु चतुर्षु शिष्येषु अन्यतमः भृगुमहर्षिः । असौ ब्रह्ममानसपुत्रः सप्तमहर्षिषु अन्यतमः। असौ श्रीमहाविष्णुरेव हविर्भोक्ता इति संघोषणं कृतवान् । असौ स्वीयपुत्रिकां महालक्ष्मीं श्रीमहाविष्णवे दत्त्वा श्वशुरस्थानं संपादितवान्[3]।

ज्योतिषशास्त्रेषु अयमग्रगण्यः । ज्योतिषशास्त्रग्रन्थप्रणेता च । वैखानसशास्त्रसम्बद्धान् नैकान् ग्रन्थान् लोकाय उपदिश्य वैदिकक्रियामार्गं संस्थापितवान् अयं भृगुमहर्षिः।

तत्र वैखानसग्रन्थाः तावत्

**खिलं क्रियाधिकारं च पुरातन्त्रं तथैव च ।**

**वासाधिकरणं ज्ञेयं चित्राधिकरणं तथा । मानाधिकरणं चैव प्रकीर्णाधिकरणं च ॥**

**निरुक्तमधिकारं च अर्चनस्याधिकारकम् । यज्ञाधिकरणं चैवं वर्णाधिकरणं तथा ॥**

**प्रतिगृह्याधिकारं च मया प्रोक्तस्य संहिताः । एतैश्चैव चतुष्षष्टिग्रन्थसंख्याक्रमं विदुः[4] ॥**

---

१. दशविधहेतुनिरूपणम् २. क्रियाधिकारः ३६, २६ ३. वेङ्कटाचलमाहात्म्यम् ४. वासाधिकारः १, १०२-१०५

खिल - क्रियाधिकार - पुरातन्त्र वासाधिकार चित्राधिकार मानाधिकार-प्रकीर्णाधिकार - निरुक्ताधिकार अर्चनाधिकार यज्ञाधिकार वर्णाधिकार प्रतिगृह्याधिकारेति द्वादश अधिकारग्रन्थानां चतुष्षष्टिग्रन्थसंख्यानुरोधेन अनेन महर्षिणा उपदिश्यते। एतेषु द्वादशग्रन्थेषु खिल - क्रियाधिकार वासाधिकार प्रकीर्णाधिकार यज्ञाधिकारेति पञ्चग्रन्थाः एव विविधाभिः संस्थाभिः द्वारा मुद्रिताः अद्य उपलब्धाश्च । एतेषु ग्रन्थेषु अन्यतमः वासाधिकारः।

अस्मिन् भृगुप्रोक्ते वासाधिकारग्रन्थे दशावतारकल्पनं कीदृशम् उपदिष्टं? तस्य स्वरूपं कथं? नाममन्त्राः के? इत्येते अंशाः यथामति पत्रेऽस्मिन् प्रस्तोतुमिच्छामि ।

**दशावतारकल्पनम्**

**मत्स्यः कूर्मो वराहश्च नारसिंहोऽथ वामनः । रामो रामश्च रामश्च कृष्णः कल्कीति ते दश**[5] ॥

मत्स्य कूर्म वराह नृसिंह वामन परशुराम श्रीराम बलराम श्रीकृष्ण कल्की इति दशानां स्वरूपाणां विष्णोः अवतारभेदाः तेषां कल्पनं प्रतिष्ठा च साङ्गोपाङ्गं उपदिश्यते वासाधिकारे। तत्र एकैकं पश्यामः-

**१. मत्स्यावतारकल्पनम्**

हस्तिपृष्ठविमाने वा कुम्भाकारविमाने वा मत्स्यमूर्तिः स्थापनीया । नासाग्रपुच्छपर्यन्तं अष्टाविंशतिमात्रकं पुच्छमूलान्तं चतुष्कम् उदरं नवमात्रकं पुच्छमूलं चतुर्मात्रम् आयामविस्तारं पक्षमात्रं भवत्विति मत्स्यमूर्तेः कल्पनं विव्रियते वासाधिकारे । पौण्डरीकाग्निकुण्डं, प्रधानतमम् अस्य देवस्य । मत्स्यः जलजः भद्रः क्रीडात्मकः इति चतुर्मूर्तिमन्त्राः उपदिष्टाः तत्र । "यत्स्वयं सृष्ट" इत्ययं मन्त्रः मत्स्यस्य प्रधानतमः भवति[6] ।

**२. कूर्ममूर्तिकल्पनम्**

नन्द्यावर्तविमाने वा कुम्भाकारविमाने वा फेलाकारविमाने वा कूर्ममूर्तिः स्थापनीया। असौ आसीनः भवेत् । उत्तमं एकतालं शिरोमानं द्विमात्रं एकाङ्गुलं कण्ठस्वरूपं हृदयं त्रिमात्रं भवेत् । गार्हपत्याग्निकुण्डं प्रधानतमम् आकूबरः जलः कूर्मः कच्छपः इति चतुर्मूर्तिमन्त्राः उपदिष्टाः तत्र । "रायामीश" इत्ययं मन्त्रः कूर्मस्य प्रधानतमः भवेत्[7] ।

**३. वराहमूर्तिकल्पनम्**

सर्वतोभद्रकविमाने वा चतुष्कूटविमाने वा पर्वताकृतिकविमाने वा वराहमूर्तिः स्थापनीया। दशतालमानेन असै कल्पनीयः। वराहमुखं अस्य भवेत्। दक्षिणे दंष्ट्रयुतः वामाङ्के स्थितां देवीं संप्रेक्षमाणस्सन् गरुडाधिष्ठितः विराजति वराहमूर्तिः ।

द्विभुजः श्वेतवर्णः ऋग्वेदरूपः,

यजुर्वेदः पीतवर्णः

बालार्कवर्णः चतुर्भुजः सामवेदरूपः

रक्तवर्णः द्विभुजः अथर्वणरूपः

मकुटाभरणसंयुक्तः तप्तकाञ्चनसन्निभः भवतु इत ऋग्गादिवेदपुरुषस्वरूपः वराहः स्पष्टं निर्दिश्यते तत्र ।

---

५. वासाधिकारः १७, ५ ६. तत्रैव १७, ६-३० ७. तत्रैव १७, १९-३०

सभ्याग्निकुण्डं प्रधानतमम् अस्य । वराहः वरदः भूमिसन्धारणः वज्रदंष्ट्रिणः इति चतुर्मूर्तिमन्त्राः उपदिष्टाः[8] ।

**४. नारसिंहमूर्तिकल्पनम्**

त्रिकूटे मण्डपे पर्वतविमाने वा नृसिंहमूर्तिः स्थापनीया। मध्यमदशतालेन मानोन्मानप्रमाणेन च त्रिमात्रं शिरोमानं नेत्रान्तं रसाङ्गुलं भवतु । पौण्डरीकाग्निकण्डं प्रधानतमं भवेत् अस्य । नारसिंहः तपोनाथः महाविष्णुः महाबलः अनन्तबलः इत्येते मूर्तिमन्त्राः नृसिंहस्वामिनमुद्दिश्य निर्दिष्टा आसन् । "योवा नृसिंह" इत्ययं मन्त्रः प्रधानतमः भवेदिति उपदिश्यते[9]।

**५. वामनमूर्तिकल्पनम्**

सोमच्छन्दविमाने वा त्रिकूटविमाने वा दीर्घशालकविमाने वा वामनमूर्तिः कल्पनीया भवेत् ।

